दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णसप्तमी
कार्तिक 16 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-12 ■ वर्ष-6 ■ अङ्क-07 | 1 | नवम्बर 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुख्यमन्त्रिणा सुक्खू-महोदयेन भाजपा-दलम् अभिलक्ष्य कृतः प्रहारः प्रावोचत्- संविधानस्य रक्षणाय सङ्ग्रामं करोति काङ्ग्रेसदलम्

4 आईआईटी-मण्डी-संस्थाने हिमाचलस्य छात्रेभ्यः 'नेट' तथा 'गेट' परीक्षायां विमुक्तिः, प्रारम्भोद्योगाय (स्टार्ट-अप) प्रतिमासं १५,००० रूप्यकाणि लप्स्यन्ते

11 सरदार पटेल विश्वविद्यालये राष्ट्रीय परिसंवादस्य आयोजनम्, देशस्य विभिन्नभागेभ्यः समागताः विद्वांसः सरदार पटेल महोदयस्य राष्ट्रनिर्माणदर्शनस्य उपरि विचार विमर्शं कृतवन्तः

राष्ट्रीयैकता-दिवसे प्रधानमन्त्रिणा एकता-नगरे चतुश्शत-कोट्यधिकरूप्यकाणां विविध-विकास-परियोजनानाम् विहितम् उद्घाटनम्



एकत्रिंशत् पर्यटन-आधारभूत-संरचना-परियोजनानाम् उद्घाटनं शिलान्यासश्च विहितः। एतासु सप्ताधिक-त्रिंशत-कोटिरूप्यकाणां व्ययेन सज्जीकृतानां त्रयोविंशति-प्रकल्पानां लोकार्पणं, अथ च अष्टादशाधिक-शतकोटिरूप्यकाणां अष्टानां प्रकल्पानां शिलान्यासः कृतः। नूतन-पर्यटन-आकर्षणेषु द्वादश-एकड-परिमिते विस्तीर्णे क्षेत्रे चतुर्दश-कोटिरूप्यकाणां व्ययेन विकसितं वर्षारण्यं प्रमुखं वर्तते, यत्र कृत्रिम वृष्टेः साहाय्येन सघन-वर्षावनस्य वातावरणं निर्मितम् अस्ति। अस्य मुख्यम् आकर्षणं वर्तुल-आकारः काच-निर्मितः आकाश-पथः अस्ति, येन पर्यटकाः अरण्यस्य विहङ्गम-दृश्यम् अवलोकयितुं शक्नुवन्ति। प्रधानमन्त्रिणा प्रकृति-पर्यटनस्य नूतनकेन्द्रभूता वामन-वृक्ष-वारिका अपि दृष्टा, यत्र विविधानां लघु-वृक्षाणां बोनसाई-सस्यकलायाः संग्रहः वर्तते। लोकार्पितासु अन्य-प्रमुख-सुविधासु आईआरसीसी आतिथ्य-सदनम्, नौका-विहार-सेवाः, अथ च प्रकृति-पथः समाविष्टाः सन्ति। अपरत्र, गोरा-भणद्वा-मार्गस्य, स्मार्ट शून्य-अपशिष्ट-प्रबन्धन-प्रकल्पस्य अथ च एकीकृत-कैकम्-तितली-उद्यानस्य शिलान्यासोऽपि विहितः।

प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य साँज्यू ऑफ यूनि इत्यत्र सरदार वल्लभभाई पटेलस्य एकपञ्चाशदधिक-शततमे जयन्ती-महोत्सवे तस्मै पुष्पाञ्जलिं समर्पितवान्। अत्रावसरे प्रधानमन्त्री नवनिर्मितस्य वर्षारण्यस्य वामन-वृक्ष-वाटिकायाश्च अवलोकनम् अकरोत्। अयं प्रवासः सरदार-वल्लभभाई-पटेल-महोदयस्य एकपञ्चाशदधिक-शततम्याः जयन्त्याः उपलक्ष्ये आयोज्यमानस्य राष्ट्रिय-एकता-दिवस-समारोहस्य भागः वर्तते। अस्मिन् अवसरे प्रधानमन्त्रिणा षड्विंशत्यधिक-चतुश्शत-कोटि-रूप्यकेभ्यः अधिक मूल्यानाम्

राष्ट्रपति-पदासीना द्रौपदी-मुर्मुः महाराष्ट्रस्य नासिक त्र्यम्बकेश्वर-सिंहस्थ-कुम्भपर्वणः शुभारम्भे कृतवती ध्वजारोहणम्



नासिक-त्र्यम्बकेश्वर-तीर्थक्षेत्रयोः गतदिवसे द्व्यधिक-द्वादशवादने सिंहस्थ-कुम्भपर्वणः विधिवत् शुभारम्भः जातः। अस्मिन् पुण्यावसरे भारतस्य राष्ट्रपतिना द्रौपदी मुर्मुवर्यया नासिक-स्थिते रामकुण्डे मुख्य-ध्वजारोहणं विहितम्, अपरत्र महाराष्ट्रस्य मुख्यमन्त्रिणा देवेन्द्र फडणवीसेन त्र्यम्बकेश्वरस्य पवित्र-कुशावर्त-तीर्थे धर्मध्वजः समुत्तोलितः । ध्वजारोहणात् पूर्वम्, राष्ट्रपतिना गङ्गा-गोदावरी-मन्दिरे रामकुण्डे च विधिवत् पूजार्चना कृता।

विदेशमन्त्रिणा डा. एस्. जयशङ्करेण नौवहन-स्वातन्त्र्यस्य रक्षणाय, नागरिक-पोतेषु नाविकेषु च आक्रमणानां स्थगनाय विहितं दृढाह्वानम्

भारतेन स्पष्टीकृतं यत् सैन्यबलेन युद्धेन वा वैश्विक समाह्वानानि समाधातुं न शक्यन्ते, अपितु सङ्घर्षाणां निवारणार्थं संवादस्य कूटनीतेश्च कृते अवसरो देयः। अमेरिकायां आयोजिते जी-विंशति विदेशमन्त्रिणां प्रथम-पूर्णसत्रे सम्बोधयन् विदेशमन्त्री डा.एस. जयशङ्करः नौवहन स्वातन्त्र्यस्य रक्षणे, अथ च अन्ताराष्ट्रिय-विधीनां विशेषतः संयुक्तराष्ट्र-समुद्री-विधि-सन्धिसम्मतस्य पालनेन नागरिक-पोतेषु नौचालकेषु च आक्रमणानां स्थगने विशेषं बलं दत्तवान्। विदेशमन्त्रिणः इदं प्रतिपादनं वैश्विक-स्तरे विविधासु दिक्षु प्रचलद्भिः सङ्घर्षैः विशेषतः रूस-यूक्रेन-युद्धेन अथ च पश्चिम-एशिया-क्षेत्रे वर्धमानेन गम्भीर अवसाद-वातावरणेन सह साक्षात् सम्बद्धं वर्तते।

सुभाषितम्

न धैर्येण विना लक्ष्मीः न शौर्येण विना जयः।
न ज्ञानेन विना मोक्षो न दानेन विना यशः॥

भावार्थः- धैर्य के बिना धन, वीरता के बिना विजय, ज्ञान के बिना मोक्ष और दान के बिना यश प्राप्त नहीं होता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तायां दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराज, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

काशी-रेलस्थानकस्य पुनर्विकास-कार्यस्य निर्माणाधीनस्य नमो-सेतोः च स्थल-निरीक्षणम् अकरोत् रेलमन्त्री



रेलमन्त्री अश्विनी-वैष्णवः वाराणस्यां काशी-रेलस्थानकस्य पुनर्विकास कार्यस्य निर्माणाधीनस्य नमो-सेतोः च स्थल-निरीक्षणम् अकरोत्। तत्र सः रेल-अधिकारिभिः सह योजनानां प्रगतेः उच्च-स्तरीय-समीक्षामपि विहितवान्। वार्ताहरैः सह सम्भाषणे श्रीवैष्णवः न्यवेदयत् यत् नमो-सेतुः रेल-मार्गस्य सडक-मार्गस्य च संयुक्त-सेतुः भविष्यति, यस्य निर्माणम् आगामीनां शत-वर्षाणां यातायात आवश्यकताः संलक्ष्य क्रियमाणम् अस्ति। अपरञ्च, रेलमन्त्रिणा अश्विनी वैष्णवेन उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगी-आदित्यनाथेन च संयुक्तरूपेण बनारस-रेलस्थानकात् वाराणस्याः नव-दिल्लीं यावत् धाविष्यमाणायाः नूतनायाः वन्दे-भारत-स्लीपर-एक्सप्रेस्-सेवायाः हरितपताकां प्रदर्श्य शुभारम्भः कृतः।

अर्नब-चक्रवातस्य प्रकोपानन्तरम् ओडिशा-आन्ध्रप्रदेशयोः

आपदुद्धरणकार्याणि तीव्रगत्या प्रचलन्ति, अरुणाचलप्रदेशे, तटीयान्ध्रप्रदेशे, केरले माहे-क्षेत्रे च धारासम्पात-वृष्टेः वर्तते पूर्वसूचना



भारतीय-ऋतु-विज्ञान-विभागेन संसूचितं यत् अर्नब-चक्रवातस्य अवशिष्ट-भागरूपं निम्न-निपीड-क्षेत्रं, यत् पूर्वं उत्तर-छत्तीसगढे तत्समीपवर्तिनि पूर्व-मध्यप्रदेशे, दक्षिण-पूर्व-उत्तरप्रदेशे पश्चिम-झारखण्डे च सक्रियम् आसीत्, तत् अद्य प्रातःकाले दक्षिण-पूर्व-उत्तरप्रदेशे तस्य पार्श्ववर्ति-क्षेत्रेषु च केन्द्रितं जातम्। अपरत्र दक्षिण-अण्डमान-सागरे तत्समीपस्थे उत्तर-अण्डमान-सागरे अण्डमान-निकोबार-द्वीपसमूहे च उद्भूतं द्वितीयं सुस्पष्ट-न्यून-निपीड-क्षेत्रम् दक्षिण-पूर्व-बङ्गालोपत्यकायां तस्य निकटवर्ति-अण्डमान-सागरे च सक्रियम् अवर्तत्। एतत् वायु-मण्डलीय-तन्त्रं तीव्रतरं भूत्वा निम्न-निपीडक्षेत्रे परिणतं भविष्यति, तदनन्तरं च अधिक घनीभूय सोमवासरस्य सायङ्कालं यावत् आन्ध्रप्रदेशस्य निकट पश्चिम-मध्य-बङ्गालोपत्यकायां सम्प्राप्स्यति। ऋतु-विज्ञान-विभागेन अरुणाचलप्रदेशे, तटीय-आन्ध्रप्रदेशे, केरल-राज्ये माहे-स्थले च पृथक् पृथक् स्थानेषु अतिवृष्टेः सञ्चेतना उद्घोषिता ।

मुख्यमन्त्रिणा सुक्खू-महोदयेन भाजपा-दलम् अभिलक्ष्य कृतः प्रहारः प्रावोचत्- संविधानस्य रक्षणाय सङ्ग्रामं करोति काङ्ग्रेसदलम्

हिमसंस्कृतवार्ताः- शिमला।

नवदेहल्यां काङ्ग्रेस-दलस्य आन्दोलनात् प्राक् शिमलायां भाजपा-पक्षतः विधीयमानं प्रदर्शनम् अभिलक्ष्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः तीक्ष्णं प्रहारं विहितवान्। सः प्रावोचत् यत् काङ्ग्रेसदलं देशे संविधानस्य सांविधानिक-संस्थानां च रक्षणाय सङ्ग्रामं कुर्वद् अस्ति। भाजपा-दलं प्रश्नानां चक्रव्यूहे पातयन् मुख्यमन्त्री अकथयत् यत् यदि देशे लोकतन्त्रं नाभविष्यत्, तर्हि प्रधानमन्त्री नरेन्द्रमोदी अष्टादशसु (१८) राज्येषु च भाजपादलस्य सर्वकाराः कथम् अरचयन्? तेन निर्वाचन- आयोग- सदृशानां सांविधानिक- संस्थानां निष्पक्षताम् अधिकृत्य अपि प्रश्नाः उत्थापिताः।शनिवासरे राजधान्याः शिमलायाः 'पीटरहॉफ'- अतिथिगृहे (होटल-पीटरहॉफ) आयोजितात् कार्यक्रमात् परं वार्ताहरैः (माध्यमैः) सह सम्भाषमाणः मुख्यमन्त्री प्रावोचत् यत् काङ्ग्रेसदलेन दीर्घकालं यावत् देशे शासनं विहितम्, किन्तु कदापि सांविधानिक-संस्थाभिः सह उपद्रवः न कृतः। लोकतन्त्रं संविधानस्य आधारेणैव प्रचलति, काङ्ग्रेसदलम् अपि अस्यैव संविधानस्य रक्षणार्थं ध्वनिम् उत्थापयति। सः अवदत् यत् लोकतान्त्रिक- व्यवस्थायाम् एतासां संस्थानां निष्पक्षतां विश्वसनीयतां च संरक्षयितुम् अतीव आवश्यकं वर्तते। सः शिमलायाः प्रतिष्ठितस्य 'वाइल्ड- फ्लॉवरहॉल'- अतिथिगृहस्य मूल्यप्रस्तावप्रक्रियां प्रदेशस्य आर्थिकदृष्ट्या महत्त्वपूर्णां प्रतिपादयन् न्यरूपयत् यत् अनेन सर्वकाराय प्रतिवर्षं ३७ कोटिरूप्यकाणां राजस्वं लप्स्यते।



आगामिषु विंशतौ (२०) वर्षेषु इयं राशिः प्रायः एकसहस्रकोटि (१००० कोटि) रूप्यकाणि यावत् प्राप्स्यति इति अनुमानम् अस्ति।

सः प्रावोचत् यत् प्रदेशसर्वकारेण दीर्घां न्यायिकसङ्ग्रामं कृत्वा 'वाइल्ड- फ्लॉवरहॉल' सम्पत्तौ स्वकीयम् अधिकारं सम्प्राप्तं, तस्य परिवर्ते च ४०१ कोटिरूप्यकाणि प्राप्तानि। अतिथिगृहस्य मूल्यप्रस्तावप्रक्रियायां 'लीला-होटल्स', ओबेरॉय समूहस्य 'ईआईएच' संस्थयोः मध्ये प्रतिस्पर्धा अभवत्। मुख्यमन्त्रिणा विज्ञापितं यत् सफलाय मूल्यप्रस्तावकर्त्रे प्रक्रियाम् अग्रे नेतुं पूर्वं १२ कोटिरूप्यकाणि समर्पणीयानि भविष्यन्ति। तदनन्तरमेव मूल्यप्रस्तावः अन्तिमतया स्वीकरिष्यते। सः इमं प्रदेशस्य हिते सर्वकारस्य महतीम् उपलब्धिम् अघोषयत्।

हिमाचलस्य ४१९ क्रीडकेभ्यः १७.८५ कोटि-रूप्यकाणां पुरस्कारवृष्टिः, मुख्यमन्त्रिणा सुक्खूमहोदयेन सम्मानिताः

हिमसंस्कृतवार्ताःशिमला। हिमाचलप्रदेशसर्वकारेण शनिवासरे राजधान्याः शिमलायाः 'होटल-पीटरहॉफ' अतिथिगृहे प्रदेशस्य प्रायः ४१९ क्रीडकाः सम्मानिताः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूमहोदयः 'हिमरत्न' कार्यक्रमाङ्गतया राष्ट्रिय-अन्ताराष्ट्रिय-स्तरीयेभ्यः क्रीडापदकविजेतृभ्यः पुरस्काररशिं वितरितवान्। अस्मिन् अन्तराले एशियाई-क्रीडासु स्वर्णपदकविजेत्र्यां भारतीय-महिला-कबड्डीदले समन्विताः नेत्री पुष्पाराणा, ज्योतिठाकूरः, भावना, पूर्वनेत्री रितुनेगी च इत्येताभ्यः अपि पुरस्काररशिः प्रदत्ता। राज्यस्तरीयसमारोहे अन्ताराष्ट्रिय-राष्ट्रियस्तरेषु उत्कृष्टप्रदर्शनं कृत्वा प्रदेशस्य नाम समुज्ज्वलं कृतवद्भ्यः क्रीडकेभ्यः १७ कोटिः ८५ लक्षरूप्यकाणां (₹१७.८५ कोटि) पुरस्काररशिः वितरिता। एतेषु अन्ताराष्ट्रियस्तरे उपलब्धयः प्राप्तवन्तः ५१ तथा च राष्ट्रियस्तरे श्रेष्ठप्रदर्शनं कृतवन्तः ३६८ क्रीडकाः समाविष्टाः सन्ति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः क्रीडकान् सममानयत्। अन्ताराष्ट्रियस्तरीयाणां क्रीडकानां कृते १३ कोटिः ५५ लक्षरूप्यकाणां तथा च राष्ट्रियस्तरीयाणां क्रीडकानां कृते चत्वारि कोटिः ३० लक्षरूप्यकाणां पुरस्काररशिः निर्धारिता वर्तते। नूतनक्रीडानीत्यन्तर्गततया क्रीडकेभ्यः प्रदत्तायां पुरस्काररशौ १५० तः ३०० प्रतिशतं यावत् संवर्धनं विहितम्। सर्वकारस्य उद्देश्यं क्रीडकेभ्यः श्रेष्ठप्रदर्शनाय प्रोत्साहनदानेन सहैव तेभ्यः भविष्ये वृत्ति-संयोगस्य उत्तमावसरानां समुपलब्धताम् आपादयितुम् अस्ति। मुख्यमन्त्रिणः निर्देशैः चतुर्षु वर्षेषु द्वितीयवारं क्रीडकानां सम्मानाय ईदृशः कार्यक्रमः आयोजितः। जापाने सद्यः आयोजितायां प्रतियोगितायां भागं गृहीतवद्भ्यः क्रीडकेभ्यः अपि नियमानुसारं पूर्णा पुरस्काररशिः प्रदास्यते। क्रीडामन्त्रिणा विज्ञापितं यत् प्रदेशे क्रीडकेभ्यः सर्वकारीयवृत्तौ क्रीडा- निर्धारितांशात् (क्रीडा-कोटा) त्रीणि प्रतिशतम् (३%) आरक्षणस्य प्रावधानम् अस्ति। क्रीडकेभ्यः वृत्तेः अधिकावसरानां समुपलब्धीकरणविषये मुख्यमन्त्रिणा सह अपि विस्तृतविमर्शः जातः। सर्वकारः क्रीडकेभ्यः प्रोत्साहनेन सह क्रीडाप्रतिभानाम् अग्रे नयनाय कटिबद्धः अस्ति।

मण्डी-मण्डलस्य सर्वाधिकसंख्याकाः ९९ क्रीडकाः सम्मानिताः

राष्ट्रियस्तरे सम्मानितेषु क्रीडकेषु मण्डी-मण्डलं सर्वमग्रेसरं वर्तते। अत्रत्याः ९९ क्रीडकाः पुरस्कारं प्राप्नुवन्। एतदतिरिच्य शिमलायाः ५४, सोलनस्य ४९, बिलासपुरस्य ३७, काङ्गड़ायाः २८, हमीरपुरस्य २४, ऊनायाः १९, कुल्लू-सिरमौरयोः १८-१८, किन्नौरस्य १५ तथा च चम्बायाः सप्त (७) क्रीडकाः सम्मानिताः अभवन्।



राष्ट्रियस्तरे दलस्पर्धायां विजये पञ्चलक्षरूप्यकाणि लप्स्यन्ते: सुक्खू-महोदयः

अस्मिन् अवसरे मुख्यमन्त्री सुक्खू-महोदयः प्रावोचत् यत् ये क्रीडकाः राष्ट्रियप्रतियोगितासु भागं गृहीत्वा दलस्पर्धायां विजयं सम्प्राप्तवन्तः, तेभ्यः पञ्चलक्षरूप्यकाणां प्रोत्साहनराशिः लप्स्यते। एतदतिरिच्य दलस्पर्धायां सम्बद्धस्य कस्यचित् क्रीडकस्य वैयक्तिकस्पर्धायां विजयप्राप्तौ तस्मै सार्धैकलक्षरूप्यकाणि (१.५ लक्षं) दास्यन्ते। २०२५-२६ वर्षस्य क्रीडकाः अपि अस्मिन् समाविष्टाः कृताः। सः अवदत् यत् 'खेलो हिमाचल' इति नाम्ना युवानः अग्रे आगच्छेयुः इति अस्माकं प्रयासः अस्ति।

जयरामठाकुरः अवदत्- सर्वकारेण केन्द्रम् अभिशापं दातुम्, आक्रोष्टुम्, आलोचनां कर्तुं च व्यतीताः चत्वारि वर्षाणि



हिमसंस्कृतवार्ताः- ऊना।

ऊनानगरे वार्ताहरैः सह सम्भाषमाणः पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरमहोदयः प्रदेशस्य वर्तमान- काङ्ग्रेस- सर्वकारस्य उपरि तीक्ष्णं प्रहारम् अकरोत्। सः प्रावोचत् यत् सः एतेषु दिनेषु समग्रप्रदेशस्य प्रवासे अस्ति, जनतया च भारतीयजनतापक्षाय (भाजपा) यः महत्तरः जनसहयोगः प्रदीयते, तेन इदं सर्वथा स्पष्टं जातं यत् जनसामान्येन अधुना हिमाचलप्रदेशे काङ्ग्रेस-पक्षं सत्तायाः बहिष्कर्तुं दृढः सङ्कल्पः कृतः। सः आरोपम् अकरोत् यत् अस्य सर्वकारस्य चतुर्णां वर्षाणां कार्यकालः केवलं केन्द्रसर्वकारस्य भर्त्सने, अपशब्दप्रदाने, मम च आलोचनायां व्यतीतः जातः। मुख्यमन्त्री एतेषु चतुर्षु वर्षेषु चतस्रः योजनाः अपि सम्यक्तया सञ्चालयितुं नाशक्नोत्, येन सः सगर्वं वक्तुं शक्नुयात् यत् काङ्ग्रेस-सर्वकारेण जनहिताय वस्तुतः किं कृतम्।

अद्यापि अस्माकं कार्यकालस्य 'हिम-केयर', 'सहारा', 'गृहिणी-सुविधा' इत्याख्याः योजनाः एव जनसामान्यस्य जिह्वाग्रे सन्ति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः एतासां योजनानां लोकप्रियतां वीक्ष्य विपरीतरूपेण ताभ्यः आयव्ययकस्य आबंटनं पिहितवान् (स्थगितवान्), स्वयञ्च नूतनाः योजनाः प्रारब्धुम् अपि नाशक्नोत्। प्रदेशस्य विपन्नां विधिव्यवस्थां प्रति चिन्तां प्रकटयन् सः अवदत् यत् यादृशं विधिव्यवस्थायाः उच्छेदनम् अस्मिन् सर्वकारे जातं, तादृशं प्रायशः कस्मिंश्चिदपि पूर्वसर्वकारे न जातम्। ऊना-गोलीकाण्डः, बिलास्पुरे कुठारकाण्डः, शिमलायां पुलिस-नियन्त्रणकक्षस्य पुरतः एव दिवा-प्रकाशे हत्या, चम्बायां च कञ्चन युवानं हत्वा स्यूते बद्ध्वा प्रणाल्यां निक्षेपणम् इत्यादयः भयङ्कराः घटनाः इतः पूर्वं कदापि न घटिताः।

अद्य समग्रप्रदेशे 'चिट्टा' मादकद्रव्यस्य उपद्रवः प्रसरति; सर्वकारः संभ्रान्तः (उद्विग्नः) तु वर्तते, किन्तु भूमौ वास्तविक- कार्यविधिकरणस्य स्थाने राजनैतिकप्रचारं चमत्कर्तुं केवलम् उत्सवेषु आयोजनेषु च व्यग्रः अस्ति। प्रतिपक्षनेता सर्वकारं संवेष्टयन् अवदत् यत् अद्य सर्वत्र भ्रष्टाचारस्य प्राबल्यं वर्तते, विविधविभागेषु सङ्घटितरूपेण क्रियमाणाय भ्रष्टाचाराय साक्षात् संरक्षणं दीयते, यस्मिन् अधिकारिणः अपि अस्मिन् लुण्ठने राजनेतृभिः सह पूर्णतया संलग्नाः सन्ति। हिमाचलप्रदेशे ११८-धारायाः साक्षाद् उल्लङ्घनं क्रियते, मध्यस्थानां माध्यमेन सर्वकारात् निर्वाधतया स्वीकृतयः प्राप्यन्ते। शिलाचूर्णन-यन्त्राणां (क्रशर) क्रीडा सम्पूर्णतया राजनेतृभिः एव क्रीड्यते। कः अनुमतिं ददाति, कश्च अवैधधनसङ्ग्रहं करोति, तत्सर्वम् अधुना जनतायाः पुरतः स्पष्टम् अस्ति। अनेन सहैव सः 'पेखुबेला'-परियोजनायाः विषयम् उत्थापयन् अवदत् यत् अस्योपरि अपि मुख्यमन्त्री वक्तुं सर्वथा संकोचं कुर्वन् वर्तते, या परियोजना अधुना भूमौ अपि विलीना (अदृश्या) जाता अस्ति। एकः निष्ठावान् मुख्य-अभियन्ता अत्रत्याय भ्रष्टाचाराय बलिः जातः। अन्वेषणं प्रचलति, बृहत्-नामानि अनादृतानि (उद्घाटितानि) भविष्यन्ति, विमलनेगिने च न्यायः लप्स्यते एव।

सः अवदत् यत् मुख्यमन्त्रिणा प्रतिशोधभावनया कार्यकरणस्य प्रवृत्तिः संवर्धिता। अस्माकं चतुर्दश-विधायकानां पूर्वविधायकानां च विरुद्धम् अभियोगाः पङ्क्तीकृत्य अधिकारिणः पीडयित्वा (प्रभावं विधाय) अन्वेषणं कारयति। अन्वेषणे यदा किमपि न लब्धं, तदा अभियोगाः दीर्घाः भवेयुः इति प्रयासः निर्मीयते। ईदृशी राजनैतिक- प्रतिशोधस्य परम्परा स्थापयित्वा आगामीकाले तेभ्यः इदम् अतीव भारभूतं भविष्यति। अयम् आरम्भः शोभनः नास्ति। सः 'आरडीजी' तथा च 'जीएसटी' (GST)-अनुदानविषये पृष्टस्य प्रश्नस्य उत्तरं ददन् प्रावोचत् यत् आरडीजी-अनुदानस्य समापने मुख्यमन्त्रिणा मिथ्या प्रचार्यते। इदं तु समग्रदेशे स्थगितम्। आरडीजी-अनुदानप्रदाने यदि अन्यायः अभवत्, तर्हि सः तादृशस्य अर्थशास्त्रिणः प्रधानमन्त्रिणः काले अभवत् यदा दश वर्षाणि यावत् केन्द्रसर्वकारे काङ्ग्रेसदलस्य शासनम् आसीत्। तथापि तस्मिन् कार्यकाले केवलम् १८,३०० कोटिरूप्यकाणि हिमाचलप्रदेशाय प्राप्तानि, यदा तु २०१४ तः २०२४ पर्यन्तं देशे प्रधानमन्त्रिणः नरेन्द्रमोदिनः कार्यकाले राज्येन ८९,३०० कोटिरूप्यकाणां राजस्व-न्यूनता-अनुदानं प्राप्तम्। सः अवदत् यत् जीएसटी-क्षतिपूर्तिः केवलं पञ्चभ्यः वर्षेभ्यः आसीत्। जून २०२१ पर्यन्तमेव अस्माभिः अनुदानं प्राप्तम्। अस्मिन् सर्वकारे एतेषु चतुर्षु वर्षेषु दीर्घकालीन- व्याज- रहित- केन्द्रीयसाहाय्यरूपेण सर्वाधिकं ७,००० कोटिरूप्यकाणां साहाय्यं प्राप्तं, यदा तु अस्माभिः पञ्चसु वर्षेषु केवलम् १,८०० कोटिरूप्यकाणि एव प्राप्तानि आसन्।

पुरातननिवृत्तिवेतनयोजनायाः कार्यान्वयनार्थं स्वामी-विवेकानन्द-कनिष्ठमहाविद्यालये

कृष्णपट्टिकाधारणपूर्वकं निषेधप्रदर्शनम्



जळगावम्। अंशदानाधारिताः DCPS, NPS, UPS तथा RNPS इत्याख्याः निवृत्तिवेतनयोजनाः अन्यायपूर्णाः सन्तीति प्रतिपादयन्तः, २००५ तमस्य वर्षस्य नवम्बरमासस्य प्रथमदिनात् परं नियुक्तेभ्यः सर्वेभ्यः शासकीयकर्मचारिभ्यः तथा शिक्षकेभ्यः पुरातननिवृत्तिवेतनयोजनायाः (Old Pension Scheme) लाभः प्रदातव्यः इति प्रमुखाम् एकमुखीं च मागणीं पुरस्कृत्य शनिवासरे, २०२६ तमस्य वर्षस्य अक्टोबरमासस्य एकत्रिंशत्तमे दिनाङ्के महाराष्ट्रराज्ये सर्वत्र कृष्णपट्टिकाधारणपूर्वकं निषेधान्दोलनम् आयोजितम्। अस्मिन् राज्यव्यापिने निषेधान्दोलने जळगावनगरे खान्देशमहाविद्यालयशिक्षणसंस्थया (KCE Society) सञ्चालिते स्वामीविवेकानन्दकनिष्ठमहाविद्यालये प्राचार्यः, उपप्राचार्या, पर्यवेक्षिका, समन्वयकाः, सर्वे अध्यापकाः तथा शिक्षकेतरकर्मचारिणः च अत्युत्साहेन सहभागं स्वीकृतवन्तः।अस्मिन् प्रसङ्गे महाविद्यालयस्य सर्वैः कर्मचारीभिः सम्पूर्णे दिवसे कृष्णवर्णीयपट्टिकाः बाहुषु धृत्वा स्वस्वनियमानुसारं नियमितं कार्यं निर्वहता अंशदानाधारितनिवृत्तिवेतनयोजनानां प्रति तीव्रः निषेधः प्रकटितः। सेवावसानानन्तरं कर्मचारिणां जीवनस्य आर्थिकसुरक्षा, सम्मानपूर्वकं जीवनयापनस्य अधिकारः तथा भविष्यस्य स्थैर्यम् एतेषां विषयाणां गाम्भीर्यं विचार्य सर्वेभ्यः कर्मचारिभ्यः पुरातननिवृत्तिवेतनयोजना अविलम्बेन प्रवर्तनीया इति दृढतया आग्रहः कृतः।

अस्मिन् निषेधप्रदर्शने महाविद्यालयस्य उपप्राचार्या प्रा. राजश्री महाजन, पर्यवेक्षिका प्रा. शिल्पा सरोदे, विज्ञानशाखायाः समन्वयकः प्रा. गुणवंत वंजारी, कलावाणिज्यशाखयोः समन्वयकः प्रा. उमेश पाटील, डॉ. अतुल इंगळे (जळगाव-जुक्टो-सङ्घटनायाः उपाध्यक्षः), प्रा. छाया चौधरी (महानगरकार्यकारिण्याः सदस्या) इत्येतेषां नेतृत्वे महाविद्यालयस्य सर्वे अध्यापकाः शिक्षकेतरकर्मचारिणः च सक्रियतया भागं गृहीतवन्तः।पुरातननिवृत्तिवेतनयोजना केवलं निवृत्तेः अनन्तरं प्राप्तव्यमानं आर्थिकसाहाय्यम् एव न, अपितु कर्मचारिणां सामाजिक-आर्थिकसुरक्षायाः, स्वाभिमानस्य तथा सन्मानपूर्वकजीवनस्य महत्त्वपूर्णः आधारः अस्ति। अतः शासनं कर्मचारिणां न्याय्यां मागणीं सकारात्मकतया विचार्य २००५ तमस्य वर्षस्य नवम्बरमासस्य प्रथमदिनात् परं नियुक्तेभ्यः सर्वेभ्यः कर्मचारिभ्यः पुरातननिवृत्तिवेतनयोजनायाः लाभं प्रददातु इति भावना अस्मिन् प्रसङ्गे व्यक्ता।


नियमितकार्यं निर्वहन्तः शान्तिपूर्णरीत्या कृष्णपट्टिकाधारणपूर्वकं कृतमिदं निषेधप्रदर्शनं कर्मचारिणां एकजुटतायाः, न्याय्याधिकारप्राप्त्यर्थं कृतनिश्चयस्य च प्रतीकम् अभवत्।

आईआईटी-मण्डी-संस्थाने हिमाचलस्य छात्रेभ्यः 'नेट' तथा 'गेट' परीक्षायां विमुक्तिः, प्रारम्भोद्योगाय (स्टार्ट-अप) प्रतिमासं १५,००० रूप्यकाणि लप्स्यन्ते

हिमसंस्कृतवार्ताः- मण्डी।भारतीय- प्रौद्योगिकी-संस्थानस्य (आईआईटी) मण्ड्याः निदेशकेन प्रो. लक्ष्मीधरबेहरामहोदयेन प्रतिपादितं यत् गतेषु कतिपयेषु वर्षेषु संस्थानेन हिमाचलस्य युवभ्यः स्वद्वाराणि अधिकाधिकम् उद्घाटितानि। २०२२-२३ तः २०२६-२७ वर्षयोः मध्ये ५७१ हिमाचली-छात्राः आईआईटी- मण्डी- संस्थानेन सह संलग्नाः जाताः। इदं गतानां पञ्चवर्षाणाम् १५९ छात्राणां तुलनायां प्रायः ३.६ गुणितम् अस्ति। एतेषु २५३ छात्रैः विद्यावारिधौ, १४६ छात्रैः एम.टेक-अनुसन्धाने, विंशतिछात्रैश्च द्वि-उपाधिकार्यक्रमेषु प्रवेशः स्वीकृतः। राज्यस्य सर्वकारीय-संस्थानानां योग्यानां स्नातकानां कृते 'गेट' तथा 'नेट' परीक्षाभ्यां विमुक्तेः प्रावधानम् अपि वर्तते। संस्थानस्य ८३४ कर्मचारिषु ७६७ कर्मचारिणः (प्रायः ९२ प्रतिशतं) हिमाचलस्य एव सन्ति। प्राध्यापक-सङ्काय-सदस्यानां संख्या २०२२ वर्षस्य अपेक्षया त्रिगुणिता भूत्वा पञ्चभ्यः पञ्चदश (१५) सञ्जाता। कुल-छात्रसंख्या १०३ प्रतिशतं प्रवर्ध्य ४,०८२ परिमिता सम्प्राप्ता।

आपत्प्रबन्धने अनुसन्धाने च बलम्

प्रो. बेहरामहोदयः अवदत् यत् हिमाचलस्य भौगोलिक-परिस्थितिभिः सम्बद्धानां समस्यानां समाधानाय २३.२६ कोटिरूप्यकाणां १४ विशेष-अनुसन्धान-प्रकल्पाः (शोध-प्रोजेक्ट्स) प्रारब्धाः। एतेषु काङ्गड़ा-मण्डीमण्डलयोः भूस्खलननिरीक्षणं, शिमला-मण्डी-मनालीक्षेत्रेषु बहुसङ्कट- आकलनं, भूकम्पसुरक्षा च समाविष्टाः सन्ति। 'टाटा-ट्रस्ट' संस्थायाः सहयोगेन २० कोटिरूप्यकाणां जलवायु-नियन्त्रणस्य आपत्प्रबन्धनस्य च गतिविधयः अपि प्रचलन्ति। पार्वत्य-कृष्यां जलवायु- अनुकूल- जल-आधारभूत- संरचनासु च कार्ये कैलिफोर्निया- आदि-ऋविदेशानां विशेषज्ञानां साहाय्यं गृह्यते।



'सेण्ट्रल- फॉर- कन्टिन्यूइङ्ग- एजुकेशन'-माध्यमेन २५७३ परिमितेभ्यः अधिकेभ्यः हिमाचली-प्रतिभागिभ्यः कृत्रिमबुद्धेः (AI), रोबोटिक्स-तन्त्रस्य, 'आईओटी' (IoT), व्यावसायिक-कौशलानां (Vocational Skills) च प्रशिक्षणं दत्तम्। 'आईआईटी- मण्डी-कैटालिस्ट' संस्थया २७८ प्रारम्भोद्योगानां साहाय्यं कृतम्, येषु ५९ प्रारम्भोद्योगाः हिमाचलस्य एव सन्ति।

प्रारम्भोद्योगाय प्रतिमासं १५००० रूप्यकाणि

राज्यस्य सर्वेषु १२ मण्डलेषु ३६ पूर्व- ग्रामीण-उद्भवन- केन्द्राणां स्थापनायाः योजनायां कार्यं प्रचलति। 'युव-आविष्कारक-छात्रवृत्त्याः' (यंग इनोवेटर फेलोशिप) अन्तर्गततया छात्रेभ्यः तन्त्रज्ञान- आधारित- प्रारम्भोद्योगानां विकासाय प्रतिमासं १५,००० रूप्यकाणि मार्गनिर्देशनं च प्रदीयते। उत्तर-दक्षिण-परिसरयोः संयोजनाय २२ कोटिरूप्यकाणां व्ययेन ३.६ किलोमीटर्-दीर्घः द्वि-मार्गीयः मार्गः सेतवश्च निर्मिताः।अपशिष्टात् ऊर्जा-प्रणाल्याः माध्यमेन प्रतिदिनं प्रायः ८०० किलोग्राम-परिमितः शुष्क-अवकरः इन्धने परिवर्त्यते, येन छात्रावास-पाकशालायां द्रवीकृत-पेट्रोलियम-अनिलस्य उपभोगः अर्धः जातः। अवकराद् गोमयाच्च २० किलोवाट- विद्युद्-उत्पादनस्य लक्ष्यं वर्तते, येन मण्डीनगराय अपि विद्युतः आपूर्तिः भविष्यति।

सः पालम्पुरे प्रस्तावितं विस्तार-पटलम् अधुना समयस्य आह्वानम् अघोषयत्। संस्थानं सेनायाः आवश्यकताभ्यः अनुसन्धानं कुर्वद् अस्ति, अत्र च ओलम्पिकस्तरीयः तरणतालः निर्मितः। दिसम्बरमासे त्रयोविंशतेः (२३) संस्थानानां प्रशिक्षूणां कृते अन्तर- आईआईटी- सांस्कृतिक-प्रतियोगिता आयोज्यते।'कोइका' (KOICA)-प्रकल्पान्तर्गततया विदेशात् ३० मिलियन-परिमितं धनम् अनुदानरूपेण प्राप्यमाणम् अस्ति, यस्मै केन्द्रसर्वकारस्य स्वीकृतिः अवशिष्टा। सः प्रावोचत् यत् यदि प्रदेशसर्वकारः द्वौ पर्वतौ संस्थानाय समर्पयेत्, तर्हि तौ स्वर्णप्रसूताविव विधातुं शक्येते। अस्मिन् अवसरे कुलसचिवः के.एस. पाण्डे-महोदयः अपि उपस्थितः आसीत्।

गोरखपुरे चक्रवातीयवृष्टेः सम्भावनया प्रशासनं सतर्कम्

- **जनसुरक्षायै अष्टसूत्रीयाः निर्देशाः निर्गताः, नियन्त्रणकक्षः चतुर्विंशतिघण्टाः सक्रियः।**

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गोरखपुरम्। बंगालस्य उपसागरे विकसितस्य चक्रवातीयमौसमतन्त्रस्य प्रभावात् उत्तरप्रदेशस्य अनेकजनपदेषु २०२६ तमस्य वर्षस्य अक्तूबरमासस्य २८-२९ दिनाङ्कयोः मेघगर्जनया सह वर्षा, वज्रपातः, अतिवृष्टेः सम्भावना वर्तते। भारतीयपर्यावरणविज्ञानविभागेन निर्गतेन पूर्वानुमानेन दृष्ट्वा गोरखपुरस्य प्रशासनं सतर्कताम् अवलम्बितवान्।अपरजिलाधिकारी (वित्त एवं राजस्व) तथा आपदाप्रबन्धनस्य प्रभारी अधिकारी जयप्रकाशेन दिनाङ्के २४ अक्तूबर २०२६ सर्वसम्बद्धाधिकारिभ्यः आवश्यकनिर्देशाः निर्गताः। सम्भावित- प्रतिकूल- वातावरणस्य प्रभावं न्यूनं कर्तुं जनधनस्य च सुरक्षां सुनिश्चितं कर्तुम् अष्टसूत्रीयकार्ययोजना निर्मिता अस्ति।

प्रशासनद्वारा निर्गताः प्रमुखनिर्देशाः-

1. निरीक्षणं, सतर्कता च- जनपदस्तरीयः, तहसीलस्तरीयः, विभागस्तरीयः च आपदानियन्त्रणकक्षः चतुर्विंशतिघण्टाः सक्रियः स्थापनीयः। सम्बन्धिताधिकारिणः, पुलिसविभागः, स्वास्थ्यविभागः तथा विद्युत्विभागस्य कर्मचारीणः सतर्काः तिष्ठेयुः।
2. कृषकसमुदायस्य कृते फसलसुरक्षा- कृषिविभागस्य अधिकारिभिः कृषकाः जागरूकाः करणीयाः यत् ते शीघ्रं परिपक्वानां फसलानां कटाई कुर्वन्तु। कटितधान्यं सुरक्षितस्थाने स्थापयन्तु तथा मुक्तस्थाने स्थितानां अनाजस्य संरक्षणाय आवश्यकव्यवस्था कुर्वन्तु।
3. जर्जरभवनेभ्यः सुरक्षितस्थानेषु स्थानान्तरणम्- प्रत्येकग्रामपञ्चायतस्य नगरीयनिकायस्य च जर्जराणि असुरक्षितानि च भवनानि चिह्नितानि करणीयानि। तेषु निवसतां जनानां कृते सुरक्षितस्थानेषु अथवा राहतशिविरेषु स्थानान्तरणस्य व्यवस्था करणीया।
4. जलप्लावनस्य निवारणाय पूर्वसिद्धता- अतिवृष्टेः समये जलप्लावनप्रभावितेषु क्षेत्रेषु जलनिकासीव्यवस्था सुदृढा करणीया। आवश्यकस्थानेषु पम्पसेट-यन्त्राणि स्थापनीयानि तथा नदीनां स्वच्छता सुनिश्चितीकरणीया।
5. सुगमायातायातव्यवस्था- अतिवृष्टेः कारणेन वृक्षाणां पतनेन यातायातव्यवस्था बाधिता भवितुम् अर्हति। अतः त्वरितप्रतिक्रियादलस्य (रेस्क्यू टीम) सज्जता आवश्यकसंसाधनैः सह पूर्वमेव सुनिश्चितीकरणीया।
6. जनजागरूकता तथा चेतावनीप्रसारः- ग्रामीणेषु नगरीयेषु च क्षेत्रेषु ढोलवादनस्य, मुनादीस्य, स्थानीयमाध्यमानां, सामाजिकमाध्यमानां साहाय्येन च जनसामान्यं जागरूकं कुर्वन्तु। जनाः 'सचेत' तथा 'दामिनी' इत्यनयोः अनुप्रयोगयोः अवतरणं कृत्वा निर्गतचेतावनीनां पालनाय प्रेरणीयाः।
7. सुरक्षात्मकसावधानताः- प्रतिकूलवातावरणे जनाः मुक्तप्रांगणेषु, जलाशयानां समीपे तथा उच्चवृक्षाणाम् अधः आश्रयं न गृह्णीयुः। वज्रपातस्य सम्भावनायां बहिः गमनं नियन्त्रितं करणीयम्।
8. त्वरितराहतं क्षतिमूल्याङ्कनं च- कस्मिंश्चित् क्षेत्रे जनहानिः, पशुहानिः, गृहक्षतिः अथवा फसलक्षतिः भवति चेत् राज्यापदामोचकनिधेः नियमानुसारं त्वरितराहतवितरणस्य व्यवस्था करणीया। निर्धारितप्रपत्रे सूचनाः सङ्कलयित्वा सम्बन्धिताधिकारिभ्यः प्रेषणीयाः।

आपातकालीन- नियन्त्रण-कक्षस्य दूरभाषक्रमाङ्काः-

- ९१९४११६२५२
- ९४५४४१६२५२
- ०५५१-२२०१७७६

प्रशासनस्य उद्देश्यं प्रतिकूलमौसमात् सम्भावितहानिं न्यूनं कृत्वा नागरिकाणां सुरक्षा सुनिश्चितं करणम् अस्ति।

मतदाता-सूच्याः कार्येषु शिथिलतायां जनपदनिर्वाचनाधिकारिणां दायित्वं निर्धारितम्

ईसीआई नेट माध्यमेन प्रतिदिनं स्वयं प्रवेश्य मतदाता-सूच्याः कार्याणां समीक्षां कर्तुं निर्देशः।

प्रपत्राणां 6, 6ए, 7 तथा 8 इत्येतेषां लम्बितप्रकरणानां निर्धारितसमये निस्तारणस्य निर्देशः।

'बुक ए कॉल विद बीएलओ' इत्यस्याः सुविधायाः अन्तर्गतं 48 होराभ्यः अधिकं यावत् कापि दूरभाष-अनुरोधः लम्बितः न भवेत्।

हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः, लखनऊम्, 31 अक्टूबर 2026।

उत्तरप्रदेशस्य मुख्यनिर्वाचनाधिकारिणः कार्यालयेन मतदातृसूच्याः शुद्धतां, त्रुटिरहिततां तथा अद्यतनतां च सुनिश्चित्य जनपदनिर्वाचनाधिकारिभ्यः महत्त्वपूर्णाः निर्देशाः प्रदत्ताः। मतदाता-सूच्याः सम्बन्धितकार्येषु अनवधाने दृश्यते चेत् सम्बन्धित-जनपदनिर्वाचनाधिकारिणां दायित्वं निर्धारितं भविष्यति। लोकप्रतिनिधित्व अधिनियमस्य 1950 तमस्य वर्षस्य 13कक धारायाः, निर्वाचक-पञ्जीकरणनियमस्य 1960 तमस्य वर्षस्य तथा भारतनिर्वाचनायोगस्य निर्देशानुसारं जनपदनिर्वाचनाधिकारी स्वजनपदे मतदातासूच्याः समस्तकार्याणां समन्वयस्य, पर्यवेक्षणस्य, अनुश्रवणस्य तथा गुणवत्तानियन्त्रणस्य पूर्णदायित्वं वहति। एतद् दायित्वं केवलं निर्वाचक- पञ्जीकरणाधिकारिषु अथवा अधीनस्थाधिकारिषु सीमितं नास्ति, अपि तु अन्तिमप्रशासनिकं पर्यवेक्षणीयं च दायित्वं जनपदनिर्वाचनाधिकारिणः एव भवति। वर्तमानकाले मतदाता-सूच्याः सर्वाणि कार्याणि ईसीआई नेट इत्यस्य माध्यमेन सम्पाद्यन्ते। अतः प्रत्येकं जनपदनिर्वाचनाधिकारी प्रतिदिनं स्वकीयेन डीईओ लॉग-इन माध्यमेन स्वयं प्रवेशं कृत्वा मतदाता-सूच्याः कार्याणां समीक्षा कुर्यात्। ईसीआई नेट इत्यस्मिन् उपलब्धानां समस्त-समीक्षासुविधानां प्रभावी उपयोगः अपि सुनिश्चितः करणीयः।कस्मिंश्चित् जनपदे अनावश्यकानि लम्बितप्रकरणानि, निष्क्रियाः उपयोक्तारः, अपूर्णाः परिचयविवरणानि, त्रुटिपूर्णा मतदाता-सूची अथवा पर्यवेक्षणे शिथिलता दृश्यते चेत् सम्बन्धित-जनपदनिर्वाचनाधिकारिणः दायित्वं निर्धारितं भविष्यति तथा प्रकरणस्य गुणदोषानुसारं यथोचितकार्यप्रक्रिया अपि क्रियते।सर्वेभ्यः जनपदनिर्वाचनाधिकारिभ्यः निर्देशः प्रदत्तः यत् उपजनपद- निर्वाचनाधिकारिणः, निर्वाचक-पञ्जीकरणाधिकारिणः, सहायकनिर्वाचक-पञ्जीकरणाधिकारिणः, बीएलओ पर्यवेक्षकाः तथा मतदानस्थलस्तरीयाधिकारिणः (बीएलओ) इत्येतेषां परिचयपत्रेषु नाम, दूरभाषसङ्ख्या, पदनाम तथा छायाचित्रस्य शुद्धतायाः सत्यापनं कुर्वन्तु। एतेषाम् अधिकारिणाम् अन्तिमप्रवेशसमयस्य अपि प्रतिदिनं समीक्षा करणीया। प्रपत्राणां 6, 6ए, 7 तथा 8 इत्येतेषां प्राप्तेः, लम्बितप्रकरणानां तथा निर्धारितसमये तेषां निस्तारणस्य प्रतिदिनं समीक्षा कर्तुं निर्देशः प्रदत्तः। आवेदनपत्रेषु विलम्बः अथवा लॉग-इन निष्क्रियता दृश्यते चेत् तत्कालं कारणं ज्ञात्वा आवश्यककार्यप्रक्रिया करणीया।

अधिकारिभिः स्वकीयाः उपयोक्तृपरिचयाङ्काः, प्रवेशगुप्तशब्दाः, ओटीपी इत्यादीनि गोपनीयविवरणानि अन्येन सह कदापि न विभाजनीयानि। किमपि प्रपत्रं अनावश्यकतया ईआरओ मार्किंग, एईआरओ मार्किंग अथवा अन्यस्मिन् स्तरे लम्बितं न स्थापनीयम्। अन्यजनपदसम्बन्धितम् आवेदनपत्रं विलम्बं विना सम्बन्धितजनपद- निर्वाचनाधिकारिणं प्रति प्रेषणीयम्। अशुद्धाधिकारिणे निर्दिष्टानि आवेदनपत्राणि तत्कालं समुचिताधिकारिणे पुनः निर्देष्टव्यानि।जनपदनिर्वाचनाधिकारिणः स्वाधीनस्थाधिकारिणां कार्याणां नियमितसमीक्षां कृत्वा आवश्यकतानुसारं सुधारात्मकां दण्डात्मकां च कार्यप्रक्रियां कुर्वन्तु। भारतनिर्वाचनायोगेन तथा मुख्यनिर्वाचनाधिकारिकार्यालयेन समये समये निर्गताः सर्वे निर्देशाः पूर्णतया पालनीयाः।मतदाता-सूच्याः तथा मतदाता-छायाचित्रपरिचयपत्रस्य (ईपीआईसी) सम्बन्धित-आक्षेपानां समयबद्धं गुणवत्तापूर्णं च निस्तारणं कर्तुं विशेषबलं प्रदत्तम्। राष्ट्रीयशिकायतासेवापोर्टलस्य (एनजीएसपी) तथा अन्येषां माध्यमानां द्वारा प्राप्तानां सर्वासां शिकायतानां प्रतिदिनं समीक्षा करणीया। लम्बितशिकायतानां प्राथमिकतया तथ्याधारितं सन्तोषजनकं च निस्तारणं सुनिश्चितं करणीयम्। जनपदनिर्वाचनाधिकारी स्वयं अथवा स्वनामनिर्दिष्टेन वरिष्ठाधिकारिणा माध्यमेन आक्षेपानाम् उत्तराणां नियमितं नमूनापरीक्षणम् अपि कारयेत्। येन शिकायतानां निस्तारणं केवलं औपचारिकं न भूत्वा वास्तविकं सन्तोषजनकं च भवेत्। प्रत्येकस्य लम्बितप्रकरणस्य कारणानि समीक्ष्य सम्बन्धिताधिकारिणः दायित्वम् अपि निर्धारितं करणीयम्।आक्षेपानाम् आवेदनपत्राणां च निस्तारणार्थं जनपदनिर्वाचनाधिकारिभिः साप्ताहिकी समीक्षासभा आयोजनीया। लम्बितप्रकरणानां प्रगतेः निरन्तरं निरीक्षणं कृत्वा पारदर्शितायाः, गुणवत्तायाः तथा निर्वाचनायोगस्य निर्देशानां पालनं सुनिश्चितं करणीयम्।

ईसीआई नेट ऐप तथा नागरिकसेवापोर्टलस्य voters.eci.gov.in इत्यस्य माध्यमेन उपलब्धायाः 'बुक ए कॉल विद बीएलओ' इति सुविधायाः विषये अपि महत्त्वपूर्णाः निर्देशाः निर्गताः। नागरिकैः कृतः कश्चिदपि दूरभाषसम्पर्कानुरोधः 48 होराभ्यः अधिकं यावत् लम्बितः न भवेत्। यदि कश्चित् मतदानस्थल-स्तरीयाधिकारी (बीएलओ) नागरिकस्य दूरभाषानुरोधस्य समये उत्तरं न ददाति अथवा नागरिकेन सह सम्पर्कं विना एव 'Contacted' अथवा 'Unavailable' इति विकल्पं चिनोति, तर्हि तस्य विरुद्धं कठोरकार्यप्रक्रिया करणीया।अन्ते निर्देशः प्रदत्तः यत् मतदाता-सूच्याः प्रत्येकं कार्यं विधिकप्रावधानानुसारं सर्वोच्चप्राथमिकतया, पूर्णगम्भीरतया, च सम्पादनीयम्।

जनगणना-२०२७-द्वितीयचरणे नागरिकाः स्वयमेव ऑनलाइन माध्यमेन पूरयिष्यन्ति पारिवारिकविवरणम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, बलरामपुरम्। जनगणना-२०२७ इत्यस्य द्वितीयचरणस्य अन्तर्गतं बलरामपुरजनपदसहिते उत्तरप्रदेशस्य सर्वेषु जनपदेषु २०२६ तमस्य वर्षस्य नवम्बरमासस्य १६ दिनाङ्कतः ३० दिनाङ्कपर्यन्तं स्वगणनाप्रक्रिया आयोजयिष्यते। अस्यां प्रक्रियायां नागरिकाः आधिकारिक- जालपुटस्य माध्यमेन स्वपरिवारस्य आवश्यकं विवरणं स्वयमेव ऑनलाइन पद्धत्या प्रविष्टुं शक्नुवन्ति। अनेन नागरिकाः स्वगृहात् एव स्वपरिवारस्य सूचनाः जनगणनायां समावेशयितुं शक्नुवन्ति। अस्मिन् विषये बलरामपुरस्य मुख्यविकासाधिकारी, अपरजिला-जनगणनाधिकारी हिमांशुगुप्तः स्ववक्तव्ये स्वगणनाप्रक्रियायाः विषये विस्तरेण सूचितवान्। बलरामपुरजनपदप्रशासनेन सर्वेभ्यः नागरिकेभ्यः स्वगणनायां सक्रियभागग्रहणं कृत्वा शुद्धायाः विश्वसनीयायाश्च जनगणनायाः सम्पादने सहयोगः करणीयः इति आग्रहः कृतः।

बजाजशर्करायन्त्रालयेन रूधौलीक्षेत्रे इक्षुतोलनार्थं तौलयन्त्रस्य स्थापना प्रारब्धा



हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः। बस्तीजनपदस्य रूधौलीक्षेत्रे बजाजशर्करा-यन्त्रालयस्य (चीनीमिल) द्वारा कृषकाणां गन्नातोलनसुविधार्थं क्रयकेन्द्रेषु तौलयन्त्रस्य स्थापना क्रियते। अस्मिन् कार्ये शर्करायन्त्रालयस्य कर्मचारी प्रवीणसिंहः तथा लक्ष्मी उपाध्यायः स्वयम् उपस्थितौ भूत्वा कार्यं सुव्यवस्थितरूपेण सम्पन्नं कारयितुं संलग्नौ स्तः। तौलयन्त्रस्य स्थापनया क्षेत्रस्य इक्षुकृषकेभ्यः स्वस्य इक्षोः विक्रये तौलने च सुविधा भविष्यति। अनेन कृषकाणां समयस्य रक्षणं भविष्यति तथा इक्षुक्रयप्रक्रिया अपि सुचारुरूपेण सञ्चालयितुं शक्यते।

शिशूनां मनोहारिणीभिः प्रस्तुतिभिः पितामह-पितामही- मातामहः-मातामह्याः मुग्धाः जाता



हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुर दिनाङ्कः – ३१ अक्टूबर, २०२६

बिहारराज्यस्य डीएवी- पब्लिक- विद्यालये बरारीभागलपुरे २०२६ तमस्य वर्षस्य अक्तूबरमासस्य ३०-३१ दिनाङ्कयोः नर्सरी-कक्षातः द्वितीयकक्षापर्यन्तं पठतां बालानां कृते पितामह-पितामही- मातामह- मातामहीदिवसः महता हर्षोल्लासेन, उत्साहेन च समायोजितः। विद्यालयस्य सभागारे आयोजिते अस्मिन् समारोहे बालानां पितामहाः, पितामह्यः, मातामहाः, मातामह्यश्च बहुसङ्ख्यया समुपस्थाय समारोहस्य शोभामवर्धयन्। दीपप्रज्वालनेन कार्यक्रमस्य शुभारम्भः अभवत्। अस्मिन्नवसरे बालैः विविधाः सांस्कृतिकाः प्रस्तुतयः समुपस्थापिताः। गीतैः, कविताभिः, नृत्यैः, लघुनाटिकाभिः तथा विविधाभिः मनोरञ्जकाभिः गतिविधिभिः च ते स्वपितामह- पितामही- मातामह-मातामहीषु प्रेम, सम्मानं कृतज्ञताभावं च प्रकटितवन्तः। शिशूनां मनोहारिणीभिः प्रस्तुतिभिः समुपस्थिताः सर्वे अतिथयः मुग्धाः अभवन्। स्वदौहित्र-पौत्रान् मञ्चे आत्मविश्वासेन विविधाः प्रस्तुतयः कुर्वतः दृष्ट्वा पितामह-पितामही-मातामह-मातामहीनां मुखेषु प्रसन्नतायाः, गौरवस्य, सन्तोषस्य च भावाः स्पष्टतया परिलक्षिताः अभवन्। अस्मिन् विशेषावसरे विद्यालयस्य कलाशिक्षकाभ्यां सुजीतकुमार मण्डलः, अभिषेककुमार शर्मा इत्येताभ्यां विद्यालयस्य प्राङ्गणे आकर्षकं स्वचित्रग्रहणस्थलम् अपि निर्मितम् आसीत्।

तत्र मनोहारिण्या सज्ज्या सह प्रेरणाप्रदः सन्देशः अपि लिखितः आसीत्। पितामह-पितामही-मातामह- मातामह्यः स्व दौहित्र-पौत्रैः सह छायाचित्राणि गृहीत्वा एतान् आनन्दमयान् क्षणान् चिरस्मरणीयान् अकुर्वन्। अस्मिन्नवसरे विद्यालयस्य प्राचार्यः सह सहायकक्षेत्रीयाधिकारी अनिलकुमारमहोदयः स्वसम्बोधने अवदत् यत् पितामह- पितामही- मातामह- मातामह्यः परिवारस्य अमूल्यनिधयः, सुदृढाधाराश्च भवन्ति। तेषाम् अनुभवः, ज्ञानं, स्नेहः, संस्काराः, आशीर्वादाश्च बालानां व्यक्तित्वनिर्माणे महत्त्वपूर्णां भूमिकां निर्वहन्ति। तेषां निःस्वार्थः स्नेहः बालकेभ्यः भावनात्मकं सुरक्षाबोधं प्रदाय जीवनस्य नैतिकान् पारिवारिकान् च मूल्यान् परिचाययति। एतादृशानि आयोजनानि नवसन्ततौ ज्येष्ठेषु आदरस्य, सम्मानस्य, आत्मीयतायाश्च भावनां सुदृढां कुर्वन्ति। सः बालान् स्वपितामह- पितामही- मातामह-मातामहीनां सदैव सम्मानं कर्तुं तेभ्यः प्राप्तान् संस्कारान् च स्वजीवने समाचरितुं प्रेरितवान्। कार्यक्रमस्य अन्ते समुपस्थितेभ्यः सर्वेभ्यः पितामह-पितामही- मातामह- मातामहीभ्यः कृतज्ञतां समर्प्य सम्मानं प्रदत्तम्। विद्यालयपरिवारस्य पक्षतः तेषां स्वस्थं सुखमयं जीवनं च कामितम्। समुपस्थिताः अभिभावकाः अतिथयश्च विद्यालयस्यास्य अभिनव-प्रशंसनीय- कार्यक्रमस्य मुक्तकण्ठेन प्रशंसाम् अकुर्वन्। कार्यक्रमस्य सफलायोजने स्वीटीदत्ता, अभिनवकुमारः, रश्मिः, अनुश्री, समृद्धिमण्डल, सरितासिंह, प्रगतिमिश्रा, श्लोका, बेबीकुमारी, मिशुः, रूबीचक्रवर्ती, मानवी, शिल्पी, रिया, फरहीननाज, आकाङ्क्षा, सुरभि, ममता, स्वातिकुमारी, सुजाता, पूजा, नेहा, आरतीकौशिकः इत्यादीनां सर्वेषां शिक्षक-शिक्षिकाणां शिक्षकेतर-कर्मचारिणां च योगदानं प्रशंसनीयम् आसीत्। वस्तुतः अयं केवलं सांस्कृतिकः कार्यक्रमः नासीत्, अपितु द्वयोः सन्तत्योः मध्ये प्रेम्णः, सम्मानस्य, स्नेहस्य, भावनात्मकसम्बन्धस्य च अनुपमः उत्सवः आसीत्। अस्य आयोजनस्य माध्यमेन एषः सन्देशः प्रसारितः यत् पितामह-पितामही -मातामह-मातामहीनां निःस्वार्थः स्नेहः, अनुभवः, आशीर्वादश्च बालानां जीवनस्य अमूल्या सम्पत्तिः अस्ति। हर्षोल्लासेन, आत्मीयतया, मधुरस्मृतिभिश्च सह समारोहस्य समापनम् अभवत्।



ज्ञानेशस्य विरुद्धं 'जन-महाभियोगः', कल्पित-संसदि प्रस्तावः पारितः, मुख्य-निर्वाचनायुक्तस्य निष्कासनेन सह अन्या अपि एका याचना उत्थिता

मुख्य-निर्वाचनायुक्तस्य (सीईसी) ज्ञानेशकुमारस्य विरुद्धं विपक्ष-मैत्री-कूटः शनिवासरे काङ्ग्रेस-दलस्य अध्यक्षस्य मल्लिकार्जुन-खडगे-महोदयस्य आवासे 'कल्पित-संसद्' (मॉक-संसद्) आहूतवान्। इयं संसद् त्रयो घण्टाः त्रयोविंशतिः निमेषाः यावत् प्रवृत्ता। पूर्व-लोकसभाध्यक्षा मीरा-कुमार-महोदया अस्याः अध्यक्षताम् अकरोत्। अस्यां कूटस्य प्रायशः नवदश-दलानां पञ्चदशाधिक-द्विशतं (२१५) सांसदाः सम्मिलिताः अभवन्।

काङ्ग्रेस-दलस्य अध्यक्षः तथा राज्यसभायां विपक्षस्य नेता मल्लिकार्जुन-खडगे-महोदयः मुख्य-निर्वाचनायुक्तस्य विरुद्धं महाभियोग-प्रस्तावम् उपस्थापितवान्। खडगे-महोदयः तस्मिन् षड् आरोपान् अरोपयत्। सर्वे सांसदाः एनं प्रस्तावं पारितवन्तः। श्रीखडगे-महोदयः मुख्य-निर्वाचनायुक्तस्य ज्ञानेशकुमारस्य विरुद्धं प्रस्तावं प्रस्तौन् आरोपम् अकरोत् यत् निर्वाचन-आयोगः संविधानस्य भावनायाः अनुगुणं निष्पक्ष-रीत्या कार्यं न करोति। सः आरोपम् अकरोत् यत् 'विशिष्ट-गहन-पुनरीक्षणस्य' (एसआईआर) व्याजेन वास्तविकानां मतदातृणां नामानि मतदाता-सूच्याः निष्कास्यन्ते। श्रीखडगे-महोदयः दावाम् अकरोत् यत् भाजप-दलस्य विरोधं कुर्वन्तः मतदातारः एव लक्षीक्रियन्ते।श्रीखडगे-महोदयः ज्ञानेशकुमारस्य सद्यः पदात् निष्कासनस्य, तस्य विरुद्धं राजद्रोहस्य अभियोग-चालनस्य, 'एसआईआर' प्रक्रियायाः स्थगनस्य च याचनाम् अकरोत्। सः अवदत् यत् विपक्षः घुसपैठिणः (अवैध-प्रवेशकान्) न, अपितु वैधानां मतदातृणां मताधिकारं रक्षितुं युद्धं कुर्वन् अस्ति। श्रीखडगे-महोदयः अकथयत् यत् अद्य अस्माकं मताधिकारः सङ्कटे वर्तते, यतः ज्ञानेशकुमारः प्रधानमन्त्रिणः गृहमन्त्रिणः च आदेशानुसारेण निर्वाचन-आयोगं चालयति। मुख्य-निर्वाचनायुक्तेन सह अस्माकं किमपि वैयक्तिकं वैरं नास्ति। वयं तु इच्छामः यत् निर्वाचन-आयोगः निष्पक्षतया कार्यं कुर्यात्; विपक्षस्य मतम् अपसार्यते तथा च शासनं क्रियते।

पतञ्जलौ बालेभ्यः प्राप्यमाणाः संस्काराः कस्यचित् स्वप्नस्य साकाररूपम् इव - प्रदीप-बत्रा



हिमसंस्कृतवार्ता — डॉ मनोजशैलः डॉ. अमदीपश्च हरिद्वारम्।

पतञ्जलिविश्वविद्यालये आयोजितं त्रिदिवसीयं द्विपञ्चाशत्तमम् (५२) अखिलभारतीय-प्राच्यविद्या-सम्मेलनम् (AIOC) ऐतिहासिक-उपलब्धिभिः व्यापकसहभागितया च सह सम्पन्नम् अभवत्। पतञ्जलिविश्वविद्यालयस्य, केन्द्रीयसंस्कृत-विश्वविद्यालयस्य, भारतीयविद्वत्परिषदश्च संयुक्ताश्रये आयोजितेऽस्मिन् राष्ट्रियसम्मेलने भारतीय-ज्ञानपरम्परायाः, संस्कृतभाषायाः, योगस्य, आयुर्वेदस्य, भारतीयदर्शनस्य, सनातनसंस्कृतेः, प्राच्यविद्यानां च संरक्षणे, संवर्धने, आधुनिकशिक्षाव्यवस्थायां तेषां समावेशे च व्यापकः विमर्शः सञ्जातः।समापनसमारोहे प्रदेशसर्वकारस्य मन्त्रिमण्डलीय-मन्त्री (कैबिनेट-मन्त्री) प्रदीप-बत्रा, योगगुरुः स्वामी रामदेवः, आचार्यः बालकृष्णश्च सहिताः समग्रदेशात् समागताः सन्ताः, धर्माचार्याः, शिक्षाविदः, विद्वांसश्च उपस्थिताः आसन्। अस्मिन् अवसरे चतुर्विंशति-विद्वद्भिः शोधकर्तृभिश्च सह उल्लेखनीयं योगदानं दत्तवत्यः विभूतयः सम्मानिताः, पञ्चत्रिंशत् (३५) पुस्तकानि च विमोचितानि।अखिलभारतीय-प्राच्यविद्या-सम्मेलनस्य अध्यक्षैः श्रीनिवास-वरखेडी-महोदयैः परमपूज्येभ्यः स्वामि-महाराजेभ्यः 'विद्याधिपति-प्रशस्ति-पत्रम्' समर्प्य सम्मानः कृतः। संस्कृतस्य, योगशास्त्रस्य, आयुर्वेदस्य, भारतीयज्ञानपरम्परायाश्च संरक्षणे संवर्धने च उल्लेखनीय-योगदानाय आचार्य-बालकृष्णः 'महामहोपाध्यायः' इति प्रतिष्ठितया उपाधिना विभूषितः। पतञ्जलिविश्वविद्यालयस्य प्रतिकुलपतिः साध्वी डॉ. देवप्रिया 'महाचार्या'-सम्मानेन अलङ्कृता। व्याकरणक्षेत्रे विशिष्टवैदुष्याय योगदानाय च डॉ. शिवानी-महोदयायै 'व्याकरण-पण्डिता-पुरस्कारः' प्रदत्तः। अपरत्र डॉ. कविता-होले-महोदया तस्याः पाण्डित्याय विशेषज्ञतायै च सम्मानिता। विविधविषयवर्गेषु उत्कृष्टाणि शोधपत्राणि उपस्थापितवद्भ्यः चतुर्विंशतिभ्यः विद्वद्भ्यः शोधकर्तृभ्यश्च 'सर्वश्रेष्ठ-शोधपत्र-पुरस्काराः' वितरिताः। अखिलभारतीय-प्राच्यविद्या-सम्मेलनस्य नवनियुक्ताध्यक्षत्वेन प्रो. अरुणरञ्जनमिश्र-महोदयः मनोनीतः। सम्मेलने अखिलभारतीय-प्राच्यविद्या-सम्मेलनस्य नवनियुक्ताध्यक्षं प्रो. अरुणरञ्जनमिश्रं समाविश्य विविधानां विदुषां पदाधिकारिणां चापि अभिनन्दनं विहितम्। संस्कृतविद्वान् कविराजः मनोहरलाल-आर्य-महोदयः अपि सम्मानितः। अस्मिन् अवसरे संस्कृतभाषायाः, भारतीयशास्त्राणां, सनातनपरम्परायाश्च संरक्षणे संवर्धने च मनीषिणां भूमिका महत्त्वपूर्णा इति प्रतिपादिता। सम्मेलनस्य समापनकाले मुख्यातिथिः प्रदेशसर्वकारस्य मन्त्रिमण्डलीय-मन्त्री प्रदीप-बत्रा अवदत् यत् सः गतेभ्यः बहुभ्यः वर्षेभ्यः पतञ्जलिना सह संयुक्तः अस्ति। पतञ्जलेः विचारधारां, कार्यशैलीं, तत्र च जायमानानि विकासकार्याणि दृष्ट्वा सः अतीव प्रसन्नतां गौरवानुभूतिं च करोति। सः अवदत् यत् अत्र बालेभ्यः यादृशी शिक्षा संस्काराश्च दीयन्ते, तत् कस्यचित् स्वप्नस्य साकारभवनम् इव अस्ति। तस्येयम् इच्छा वर्तते यत् देशस्य अन्ये जनाः संस्थानानि च इमम् आदर्शम् अङ्गीकुर्युः, इतश्च प्रेरणां गृह्णीयुः। सः अकथयत् यद् अस्माभिः मिलित्वा सनातनधर्मं, वैदिकपरम्पराः, भारतस्य च गौरवपूर्णम् इतिहासं संस्कृतिं च अधिकाधिकं प्रखरं विधातव्यम्। अस्मिन् अवसरे परमपूज्य-स्वामि-महाराजेन पतञ्जलिपरिवारस्य अभिन्नसदस्याय तथा च सम्मेलनस्य मुख्यसंयोजकाय श्री-ललित-पोफलिया-महोदयाय, तस्य सुपुत्राय श्री-हर्षद-पोफलिया-महोदयाय, सहसंयोजकाय श्रीकान्त-बडवे-महोदयाय, श्री-राहुल-राठी-महोदयाय च कृतज्ञता ज्ञापिता।प्रतिकुलपतिना साध्वी डॉ. आचार्या-देवप्रिया-महोदयया मानविकी-सङ्कायाध्यक्षाणां प्रो. मयङ्क-अग्रवाल-महोदयानां, दूरस्थशिक्षाविभागस्य निदेशकानां प्रो. सत्येन्द्र-मित्तल-महोदयानां, कुलसचिवानां डॉ. ऋत्विक-सहाय-बिसारिया-महोदयानां, विज्ञान-सङ्कायाध्यक्षाणां डॉ. ए.के. सिंह-महोदयानां, उपकुलसचिवानां डॉ. निर्विकार-महोदयानां च सहितानां सर्वेषां शिक्षकाणां, विभागाध्यक्षाणां, सङ्कायसदस्यानां, कार्यक्रमसमन्वयकानां, कर्मचारिणाम्, आयोजनसमितीनां, छात्राणां च प्रति कृतज्ञता प्रकटिता। विशेषरूपेण तेषां शिक्षकसमन्वयकानां छात्राणां च भूरिशः प्रशंसा कृता, यैः अहोरात्रं परिश्रमं कुर्वद्भिः अतिथिसत्कारस्य, पञ्जीकरणस्य, शैक्षणिकसत्राणां, शोधपत्रप्रस्तुतीकरणस्य, आवासस्य, भोजनस्य, मञ्चसञ्चालनस्य, तान्त्रिकव्यवस्थायाः (तकनीकी), सांस्कृतिककार्यक्रमाणां च सहितस्य प्रत्येकदायित्वस्य पूर्णया निष्ठया निर्वहणं विहितम्। विश्वविद्यालयपरिवारेण निगदितं यद् अस्य ऐतिहासिकस्य आयोजनस्य साफल्यं प्रत्येकशिक्षकस्य, समन्वयकस्य, छात्रस्य च सामूहिकप्रयासस्य, समर्पणस्य, निःस्वार्थसेवा-भावस्य च सुखदः परिणामः अस्ति।

शताधिकाभिः सांस्कृतिक-प्रस्तुतिभिः विमोहितं मनः

त्रिदिवसीयसम्मेलनस्य अवसरे पतञ्जलि-विश्वविद्यालयस्य सांस्कृतिकदलस्य छात्रैश्च भारतीयसंस्कृतिं, परम्पराम्, आध्यात्मिकमूल्यानि चाधृत्य विहिताभिः शताधिकाभिः (१००+) सांस्कृतिकप्रस्तुतिभिः गतिविधिभिश्च स्वकीय-प्रतिभा प्रदर्शिता।एताभिः प्रस्तुतिभिः अतिथीनां, सन्तानां, विदुषां च मनांसि मोहितानि। कार्यक्रमस्य अन्ते स्वामी-रामदेवेन सम्मेलनस्य मुख्ययोजकस्य ललित-पोफलिया-महोदयस्य सुपुत्राय हर्षद-पोफलिया-महोदयाय, सह-आयोजकाभ्यां श्रीकान्त-बड़वे-राहुल-राठी-महोदयाभ्यां च तेषां योगदानाय कृतज्ञता प्रदर्शिता। साध्वी-डॉ.-देवप्रियया विश्वविद्यालयस्य अध्यापकानां, विभागाध्यक्षाणां, सङ्कायसदस्यानां, कार्यक्रम-संयोजकानां, कर्मचारिणां, प्रबन्धसमीतीनां, छात्राणां च योगदानस्य भूरिशः प्रशंसा कृता। तया प्रोक्तं यत् अतिथिसत्कारे, पञ्जीकरणे, शैक्षणिकसत्रेषु, शोधपत्रप्रस्तुतीकरणे, आवासव्यवस्थायां, भोजनप्रबन्धे, मञ्चसञ्चालने, प्राविधिकव्यवस्थासु, सांस्कृतिककार्यक्रमेषु च सर्वैः पूर्णया निष्ठया कार्यं कृतम्।सम्मेलनस्य एषा सफलता भारतीयज्ञानपरम्परायाः, संस्कृतस्य, योगस्य, आयुर्वेदस्य, सनातनसंस्कृतेश्च संरक्षणस्य संवर्धनस्य च दिशि कञ्चन महत्त्वपूर्णं पदं मन्यते।

पतञ्जलि-विश्वविद्यालये द्विपञ्चाशत्तमम् (५२ तमम्) अखिलभारतीय-प्राच्यविद्या-सम्मेलनं सम्पन्नम्, सनातनपरम्परातः आरभ्य कृत्रिमप्रज्ञां यावत् विषयेषु सञ्जातं मन्थनम्



हिमसंस्कृतवार्ता - हरिद्वारम्। पतञ्जलि-विश्वविद्यालये आयोजितं द्विपञ्चाशत्तमम् (५२ तमम्) अखिलभारतीय-प्राच्यविद्या-सम्मेलनं दिनत्रयं यावत् प्रवृत्तात् व्यापकात् शैक्षणिक-आध्यात्मिक-सांस्कृतिक-विमर्शात् परम् ऐतिहासिक-उपलब्धिभिः सह सम्पन्नं जातम्। पतञ्जलि-विश्वविद्यालयस्य, केन्द्रीय-संस्कृत-विश्वविद्यालयस्य तथा च भारतीय-विद्वत्-परिषदः संयुक्ततत्त्वावधाने आयोजितेऽस्मिन् राष्ट्रियसम्मेलने भारतीयज्ञानपरम्परायाः, संस्कृत-भाषायाः, योगस्य, आयुर्वेदस्य, भारतीयदर्शनस्य, सनातनसंस्कृतेः, प्राच्यविद्यानां संरक्षणस्य तथा च आधुनिकशिक्षाव्यवस्थायाम् एतासां समावेशस्योपरि विस्तरेण चर्चा सञ्जाता। सम्मेलने भारतीयज्ञानपरम्परायाः आधुनिकविज्ञानप्रविध्योश्च मध्ये समन्वयस्थापनस्यापि बलं दत्तम्।

समापनसमारोहे प्रदेशसर्वकारस्य मन्त्रिमण्डलस्य (कैबिनेट्) मन्त्री प्रदीपबत्रा-महोदयः, योगगुरुः स्वामी रामदेवः, आचार्यः बालकृष्णः, समग्रदेशात् समागताः सन्त-महात्मानः, धर्माचार्याः, शिक्षाविदः, विद्वांसश्च उपस्थिताः आसन्। त्रिदिवसीयेऽस्मिन् आयोजने देशस्य षड्विंशतेः (२६) राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च प्रायशः अष्टादशशतं (१८००) प्रतिभागिनः सहभागितां कृतवन्तः। सम्मेलनस्य अवसरे पञ्चत्रिंशतः (३५) पुस्तकानां विमोचनं विहितम्, अपरपक्षे विविधविषयेषु उत्कृष्टशोधपत्रप्रस्तोतृभ्यः चतुर्विंशतिविद्वद्भ्यः शोधच्छात्रेभ्यश्च सम्मानः प्रदत्तः।

भारतीयपञ्चाङ्गाय विक्रमसंवताय च राष्ट्रियजीवने व्यापकं स्थानं प्राप्यताम् : स्वामी रामदेवः

योगगुरुणा स्वामि-रामदेवेन भारतीयसंस्कृतेः, सनातनपरम्परायाः, राष्ट्रियाभिज्ञानस्य च सुदृढीकरणे बलं ददता उक्तं यत् भारतीयपञ्चाङ्गं विक्रमसंवतं च राष्ट्रियजीवने अधिकव्यापकरूपेण अङ्गीकरणस्यावश्यकता वर्तते। तेनोक्तं यत् सनातनसंस्कृतिः केवलं धार्मिक्याम् आस्थायां सीमिता नास्ति, अपि तु इयम् अहिंसायाः, सत्यस्य, सद्भावस्य, मानवहितस्य चोपरि आधृतं जीवनदर्शनं वर्तते।स्वामि-रामदेवेन ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-इत्येतेषाम् अवधारणानां केवलं जातीनां सीमासु सङ्कुचितदृष्ट्या दर्शनापेक्षया गुणस्य, कर्मणः, चरित्रस्य च व्यापके सन्दर्भे अवगमनस्य विषयः प्रतिपादितः। तेनोक्तं यत् शिक्षायाः उद्देश्यं केवलं वृत्तिप्रापणं (रोजगारप्रदानं) नास्ति, अपि तु छात्रेषु स्वस्थविचाराणां, नैतिकमूल्यानां, व्यापकदृष्टिकोणस्य, सांस्कृतिकचेतनायाश्च विकासकरणमपि भवेत्। सः वर्तमानशिक्षापद्धतेः न्यूनातिरेकतासु त्रुटिषु ध्यानम् आकर्षयन् भारतीयज्ञानपरम्परायै सनातनजीवनमूल्येभ्यश्च शिक्षाव्यवस्थायाम् उचितस्थानप्रदानस्यावश्यकताम् अबोधयत्।

सनातनपरम्पराम् अधिकृत्य पतञ्जलौ रचितः इतिहासः - आचार्यः बालकृष्णः

आचार्येण बालकृष्णेन सम्मेलनम् एतत् भारतीयज्ञानपरम्परायाः सनातनसंस्कृतेश्च संरक्षणस्य दिशि कञ्चन महत्त्वपूर्णोपलब्धिरूपेण प्रतिपादितम्। तेनोक्तं यत् सम्मेलनावसरे सम्पन्नैः विचारविमर्शैः सन्त-महात्मनां सहभागितया च बहुषु महत्त्वपूर्णविषयेषु सार्थकः संवादः सञ्जातः।तेनोक्तं यत् विविधेभ्यः मतेभ्यः पन्थेभ्यश्च सम्बद्धानां सन्तानाम् एकस्मिन् मञ्चे समवेतीकरणं तथा च सनातनशास्त्राणां शुद्धये सर्वसम्मत्या समितेः सङ्घटनं स्वयमेव महती उपलब्धिरस्ति। सम्मेलने निर्मिता 'सनातनशास्त्र-शुद्धि-समितिः' तेन ऐतिहासिकी उपक्रान्तिः उक्ता।आचार्य-बालकृष्णेन उक्तं यत् सम्मेलने विद्वांसः सन्ताश्च प्रातःकालाद् आरभ्य निशीथं यावत् उपविश्य गम्भीरविषयेषु विचारविमर्शं कृतवन्तः। भारतीयज्ञानपरम्परायाः, शास्त्राणां, सनातनसंस्कृतेश्च संरक्षणाय सर्वेषाम् एकीभूय कार्यकरणं भविष्यस्य कृते प्रेरणादायकं वर्तते।

स्वामि-रामदेवाय 'विद्याधिपति-प्रशस्ति-पत्रम्' आचार्य-बालकृष्णाय 'महामहोपाध्याय' इति सम्मानम्

सम्मेलनावसरे भारतीयज्ञानपरम्परायाः, संस्कृतस्य, योगशास्त्रस्य, आयुर्वेदस्य च क्षेत्रेषु उल्लेखनीयं योगदानं कृतवत्यः विभूतयः सम्मानिताः कृताः।अखिलभारतीय-प्राच्यविद्या-सम्मेलनस्य अध्यक्षैः केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कुलपतिभिः प्रो. श्रीनिवास-वरखेडी-महोदयैः परमपूज्येभ्यः स्वामि-रामदेवेभ्यः 'विद्याधिपति-प्रशस्ति-पत्रम्' समर्प्य सम्मानं कृतम्।

तथैव संस्कृतस्य, योगशास्त्रस्य, आयुर्वेदस्य, भारतीयज्ञानपरम्परायाश्च संरक्षणे संवर्धने च उल्लेखनीययोगदानाय आचार्य-बालकृष्णः प्रतिष्ठितायाः 'महामहोपाध्यायः' इत्युपाध्या विभूषितः। पतञ्जलि-विश्वविद्यालयस्य प्रतिकुलपतिने साध्वी-डॉ.-देवप्रियायै 'महाचार्या' इति सम्मानः प्रदत्तः। व्याकरणक्षेत्रे विशिष्टवैदुष्याय डॉ. शिवानी वि. महोदयायै 'व्याकरणपण्डिता' इति सम्मानः समर्पितः। एतदतिरिच्य डॉ. कविता होले महोदयां संयोज्य अन्येभ्योऽपि विद्वद्भ्यः तेषां योगदानाय सम्मानः विहितः। विविधविषयवर्गेषु उत्कृष्टशोधपत्राणि समुपस्थापयद्भ्यः चतुर्विंशतिभ्यः (२४) विद्वद्भ्यः शोधच्छात्रेभ्यश्च सर्वश्रेष्ठशोधपत्रपुरस्काराः वितरिताः। संस्कृतविदुषः कविराज-मनोहरलाल-आर्यस्य सहितानां विविधानां विदुषां पदाधिकारिणां चापि अभिनन्दनं कृतम्। सम्मेलने प्रोफेसर्-अरुणरञ्जनमिश्र-महोदयाः अखिलभारतीय-प्राच्यविद्या-सम्मेलनस्य नूतनाध्यक्षरूपेण मनोनीताः।

सनातनदर्शने निहितम् अस्ति मानवहितस्य प्रकृतिसंरक्षणस्य च सन्देशः - एन.पी. सिंहः

भारतीयशिक्षाबोर्डस्य अध्यक्षेण एन.पी. सिंहेन उक्तं यत् सनातनदर्शनं केवलम् आध्यात्मिकचिन्तनपर्यन्तं सीमितं नास्ति, अपि तु अस्मिन् जीवनस्य, समाजस्य, प्रकृतेः, समग्रमानवकल्याणस्य च व्यापको दृष्टिकोणः अन्तर्भूतः अस्ति। तेन भारतीयज्ञानपरम्परायाः आधुनिकविज्ञानप्रविध्योश्च मध्ये समन्वयस्थापनं समयानुकूलम् आवश्यकम् उक्तम्। सहैव भारतीयसंविधानस्य उद्देशिकायां (प्रस्तावनायां) सन्निविष्टानां सामाजिक- आर्थिक-राजनैतिकन्यायानाम् आदर्शानां सनातनमूल्यानां च व्यापकसामाजिकसन्दर्भेऽपि विचाराः समुपस्थापिताः।

समग्रे भारते गुरुकुलशिक्षायाः अङ्गीकरणस्यावश्यकता – स्वामी आनन्दस्वरूपः



समापनसमारोहे समागतेन शाम्भवीपीठाधीश्वरेण स्वामि-आनन्दस्वरूपमहाराजेन संस्कारयुक्तायाः शिक्षाव्यवस्थायाः विकासे बलं दत्तम्। तेनोक्तं यत् राष्ट्रव्यापिस्तरे गुरुकुलशिक्षणपद्धतेः अङ्गीकरणस्य आवश्यकता वर्तते। तेन परामर्शः दत्तः यत् अष्टभ्यः एकादशवर्षपर्यन्तवयस्केभ्यः (८–११) बालेभ्यः गुरुकुलाधारितशिक्षायाः उपलम्भीकरणव्यवस्थायाः प्रवर्तने विचारः करणीयः। स्वामि-आनन्दस्वरूपेण पतञ्जलि-विश्वविद्यालयस्य भारतीयशिक्षाबोर्डस्य च प्रयासानां भूरिशः प्रशंसा कुर्वता स्वकीययोः द्वयोः विद्यालययोः भारतीयशिक्षाबोर्डेन सह सम्बद्धीकरणस्य घोषणाऽपि कृता।

षड्विंशतिः राज्येभ्यः अष्टादशशतं (१८००) प्रतिभागिनः सम्मिलिताः

सम्मेलने देशस्य षड्विंशतिः (२६) राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च प्रायशः अष्टादशशतं (१८००) प्रतिभागिनः सहभागितां कृतवन्तः। एतेषु पञ्चशताधिक-द्विपञ्चाशत् (५५२) शिक्षकाः प्राध्यापकाश्च, सप्तषष्ट्यधिक-चतुश्शतं (४६७) शोधच्छात्राः, त्र्यधिक-चतुश्शतं (४०३) छात्राः तथा च अष्टसप्तत्यधिक-त्रिशतं (३७८) अन्ये प्रतिभागिनः समाविष्टाः आसन्।आयोजने द्वात्रिंशतः (३२) कुलपतीनां, चत्वारिंशदधिकानां (४०+) सन्तानां, नवत्यधिकानां (९०+) विदुषां च सहितानां विविधानां शैक्षिकाणां प्रबन्धसमीतीनां च प्रतिनिधीनाम् उपस्थितिः आसीत्। दिनत्रयं यावत् प्रवृत्ते अस्मिन् सम्मेलने विद्वद्भिः भारतीयशास्त्रैः, संस्कृतसाहित्येन, दर्शनेन, योगेन, आयुर्वेदेन, पारम्परिकज्ञानविज्ञानेन च सम्बद्धेषु विविधविषयेषु स्वकीयविचाराः समुपस्थापिताः।

पञ्च नूतनाः शोधानुभागाः (विषयवर्गाः) योजिताः, तिस्रः नूतनाः पुरस्कारश्रेण्यः आरब्धाः

सम्मेलनस्य शैक्षणिक-उपलब्धिषु शोधपत्रप्रस्तुत्यर्थं पञ्चानां नूतनानां विषयवर्गाणां संयोजनं महत्त्वपूर्णम् आसीत्। एतेषु 'कुम्भरहस्यम्', 'भारतीयज्ञानप्रणाली', 'भारतीयानुसन्धानपद्धतिः', 'बालसाहित्यम्' तथा च 'प्राच्यविद्यायाः पुनरावलोकनम्' इति विषयाः समाविष्टाः सन्ति।

एतेषां विषयाणां समावेशनेन भारतीयज्ञानपरम्परायाः विविधायामेषु अनुसन्धानस्य शैक्षिकादानप्रदानस्य च विस्तारः संवृद्धः। एतदतिरिच्य पतञ्जलि-विश्वविद्यालयस्य पक्षतः प्रतिवर्षं तिस्रः नूतनाः पुरस्कारश्रेण्यः प्रायोजितुम् उपक्रमः कृतः, यासाम् आरम्भः अस्मादेव सम्मेलनाद् अभवत्।

पञ्चत्रिंशतः पुस्तकानां विमोचनम्, द्विनवतिः पुस्तक-प्रदर्शनी-प्रकोष्ठाः आकर्षकाः अभवन्

सम्मेलनावसरे भारतीयज्ञानपरम्परा- योग-आयुर्वेद-संस्कृतसाहित्य- भारतीयदर्शन- तथा च प्राच्यविद्यासम्बद्धानां पञ्चत्रिंशतः (३५) ग्रन्थानां विमोचनं विहितम्।

विविधविषयवर्गाणाम् अन्तर्गतं शोधपत्राणि प्रस्तूयन्त। एतेन सहैव द्विनवतिः (९२) पुस्तक-प्रदर्शनी-प्रकोष्ठाः (स्टॉल्स्) स्थापिताः आसन्, येषु विभिन्नप्रकाशकैः, संस्थाभिः, प्रायोजकैरपि सहभागिता कृता। एतेषां प्रकोष्ठानां माध्यमेन छात्रैः, शोधच्छात्रैः, विद्वद्भिश्च भारतीयशास्त्राणां, संस्कृतसाहित्यस्य, नूतनशोधप्रकाशानां च परिचयं प्राप्तुम् अवसरः लब्धः।

कुलपतिसम्मेलने उच्चशिक्षायाः भारतीयज्ञानप्रणाल्याश्चोपरि मन्थनम्

सम्मेलनस्य अन्तिमे दिने कुलपतिसम्मेलनस्य आयोजनं विहितम्। पूज्यस्वामि-आर्षदेवस्य तथा च डॉ.-गौतम-आर्.के.-महोदयस्य संयोजने सम्पन्नायां गोष्ठ्यां विविधानां विश्वविद्यालयानां कुलपतयः वरिष्ठाः शिक्षाविदश्च भारतीयज्ञानप्रणालीम् उच्चशिक्षायाः मुख्यधारया सह योजयितुं विचारविमर्शं कृतवन्तः। गोष्ठ्यां संस्कृतस्य प्राच्यविद्यानां चाध्ययन-अध्यापनस्य प्रोत्साहनाय, विश्वविद्यालयानां मध्ये शैक्षिकादानप्रदानस्य संवर्धनाय, भारतीयानुसन्धानपद्धतेः विकासाय तथा च पारम्परिकज्ञानविज्ञानम् अधिकं शोधाभिमुखं विधातुमित्यादिषु विषयेषु गम्भीरा चर्चा सञ्जाता।

लौहपुरुषस्य सरदारवल्लभभाईपटेलस्य जयन्ती श्रद्धापूर्वकं समायोजिता



हिमसंस्कृतवार्ताः- मेहदूपार (सन्तकबीरनगरम्)।

श्रीवीराबाबा रामदुलारे शुक्ल नेताजी सुभाषचन्द्रबोस संस्कृत- माध्यमिक- विद्यालये मेहदूपारे भारतस्य लौहपुरुषस्य, राष्ट्रैकतायाः शिल्पिनः च सरदारवल्लभभाईपटेलस्य जयन्ती श्रद्धाभक्तिपूर्वकं समायोजिता।अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्यः वृजेशकुमारपाण्डेयः सरदारवल्लभभाईपटेलस्य चित्रे माल्यार्पणं कृत्वा तस्मै श्रद्धाञ्जलिम् अर्पितवान्। सः अवदत् यत् सरदारपटेलः स्वस्य अदम्यसाहसेन, दृढसङ्कल्पेन, कुशलनेतृत्वेन च स्वतन्त्रभारतस्य एकीकरणे महत्त्वपूर्णं योगदानम् अयच्छत्। तस्य राष्ट्रनिष्ठा, त्यागः, समर्पणभावना च सर्वेषां कृते प्रेरणास्रोतः अस्ति। अस्मिन् प्रसङ्गे छात्राः राष्ट्रैकतायाः, सामाजिकसमरसतायाः, देशभक्तेः च भावनां स्वजीवने आत्मसात्कर्तुं सङ्कल्पं कृतवन्तः।

कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालयस्य ज्योतिषविभागाध्यक्षाय सह- प्राध्यापकाय च राष्ट्रियशिक्षागौरवसम्मानं प्राप्तिः



हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः। कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालयस्य ज्योतिष- विभागाध्यक्षाय सह- प्राध्यापकाय च डॉ. नन्दनकुमारतिवारिणे समर्पितम् "राष्ट्रियशिक्षागौरवसम्मानम् २०२६"। गोवाराज्ये आयोजितायाम् अन्ताराष्ट्रिय-सङ्गोष्ठ्याम् अक्तूबरमासस्य सप्तविंशत्यष्टाविंशतिदिनाङ्कयोः शिक्षाजगति स्वकीयोत्कृष्टयोगदानाय अनेन सम्माननेन स भूषितो जातः। "भारतीयज्ञानपरम्परायाः संरक्षणे कृत्रिमबुद्धेः (AI) भूमिका" इति विषयमधिकृत्य तेन व्याख्यानं दत्तम् तथैव एकेन सत्रेणाध्यक्षत्वमपि कृतम्। अस्मिन् शुभप्रसङ्गे कुलपतिमहोदयान् रेक्टरमहोदयां विश्वविद्यालयसदस्यांश्च प्रति डा. नन्दनकुमार-तिवारिणा कृतज्ञता प्रकटीकृता।

श्रीशिवप्रसादसंस्कृत- महाविद्यालयस्य प्राङ्गणे ४८ वर्षाणां पुरातनस्मृतयः समुज्जीविताः



हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः, लखनऊ। श्रीशिवप्रसाद- संस्कृत-महाविद्यालयस्य परिसरे आगत्य ४८ वर्षेभ्यः पूर्वस्याः स्मृतेः पुनः स्मरणं जातम्। तत्र तदेव भवनम्, ताः एव प्राचीराः, स एव प्राङ्गणः च दृष्ट्वा हृदयं भावविभोरम् अभवत्। यद्यपि महाविद्यालयस्य भवनं प्राचीनमेव अस्ति, तथापि प्राङ्गणे नव्यतया प्रतिष्ठापितः भूतभावनः भगवान् शिवः, छात्रावासस्य नवनिर्मिताः कक्षाः तथा महाविद्यालयस्य प्राचार्येण आचार्यविनोदकुमारमिश्रेण स्वकीयेन परिश्रमेण सङ्कल्पेन च प्रज्वालिताः लघुदीपाः अर्थात् निवासिनः छात्राः विशेषतया आकर्षणस्य केन्द्रम् अभवन्। एतेषु अन्तेवासिषु वटुषु केचन भविष्ये निश्चितमेव स्वप्रतिभया ज्ञानप्रकाशेन च समाजे स्वकीयम् आलोकं प्रसारयिष्यन्ति इति आशा व्यक्ता।अवसरेऽस्मिन् महाविद्यालयस्य प्राचार्याय आचार्यविनोदकुमारमिश्राय तथा समस्त-महाविद्यालय- परिवाराय हृदयस्य गभीरतलात् हार्दिकम् अभिनन्दनं, अशेषाः शुभकामनाः आशीर्वादाश्च समर्पिताः।

साभारम्- संस्कृतस्य सुप्रसिद्धायै कवयित्र्यै लेखिकायै च आदरणीयायै नवलताजीवर्यायै, तस्याः वाट्सएप्-पृष्ठात्।

सिद्धार्थनगरे लौहपुरुषस्य सरदार- वल्लभभाईपटेलस्य जयन्ती समायोजिता राष्ट्रीय- एकतादिवसोपलक्ष्ये एकतायाः अखण्डतायाश्च शपथः प्रदत्तः



हिमसंस्कृतवार्ताः वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। लौहपुरुषः सरदारवल्लभभाईपटेलः महान् व्यक्तित्वसम्पन्नः राष्ट्रनेता आसीत्। स्वकीयया दूरदर्शितया बुद्धिकौशलेन च सः भारतस्य देशीयसंस्थानानि भारतीयसंघे विलीनानि कर्तुं महत्त्वपूर्णं योगदानम् अकरोत्। वयं सर्वे तस्य व्यक्तित्वात् कृतित्वाच्च प्रेरणां गृहीत्वा भारतस्य एकतायाः अखण्डतायाश्च मार्गं प्रशस्तं कुर्याम इति विचाराः जिला एकीकरण समित्या सिद्धार्थनगरस्य तत्वावधाने डॉ. भीमराव अम्बेडकरसभागारे आयोजिते भारतरत्न-लौहपुरुष- सरदार- वल्लभभाईपटेलस्य जन्मजयन्तीसमारोहे मुख्यातिथिना सांसदप्रतिनिधिना एस. पी. अग्रवालेन व्यक्ताः। कार्यक्रमस्य शुभारम्भः मुख्यातिथिना सरदार-वल्लभभाईपटेलस्य चित्रे माल्यार्पणं कृत्वा कृतः। कार्यक्रमस्य अध्यक्षतां कुर्वता मुख्यविकासाधिकारिणा बलरामसिंहेन अपि तस्य चित्रे माल्यार्पणं कृत्वा स्वसम्बोधने उक्तं यत् भारतस्य एकतायाः अखण्डतायाश्च स्थापनायां सरदारपटेलस्य योगदानम् अविस्मरणीयम् अस्ति। वयं सर्वे तस्य राष्ट्रसेवायाः ऋणिनः स्मः। सः ५६५ देशीयसंस्थानानि भारते विलाप्य भारतमातुः सच्चः सुपुत्रः इति स्वकीयं स्थानं स्थापितवान्। मुख्यविकासाधिकारिणा उक्तं यत् प्रतिवर्षं अक्तूबरमासस्य ३१ दिनाङ्के सरदारपटेलस्य जन्मदिवसः राष्ट्रियैकतादिवसरूपेण आचर्यते। सरदारपटेलः सशक्तस्य, समृद्धस्य समर्थस्य च भारतस्य निर्माणाय स्वजीवनं समर्पितवान्। तस्य त्यागः समर्पणं च विकसितस्य आत्मनिर्भरभारतस्य निर्माणाय सर्वेषां कृते प्रेरणादायकम् अस्ति। राष्ट्राय कृतस्य महत्त्वपूर्णस्य योगदानस्य सम्मानार्थं भारतसर्वकारेण तस्मै भारतरत्नसम्मानः प्रदत्तः। अस्मिन्नेव अवसरे मुख्यविकासाधिकारिणा उपस्थितजनान् राष्ट्रियैकतायाः शपथं कारितम्।कार्यक्रमे जिला समाजकल्याणाधिकारी (विकास) मीनाश्रीवास्तवा, एसएसबी-अधिकारी गौरवमीणा, पीओ-डूडा रविकान्तसिंहः, गङ्गाधरदुबे, जिला ग्रामोद्योगाधिकारी च अन्ये गणमान्यजनाः अपि स्वविचारान् प्रस्तुतवन्तः। कार्यक्रमस्य सञ्चालनं सिद्धार्थशङ्करेण कृतम्। कार्यक्रमस्य समापनानन्तरं मुख्यविकासाधिकारिणा आदर्शवृद्धाश्रमे वृद्धजनेभ्यः भोजनं वितरितम्। ततः जिला संयुक्तचिकित्सालये चिकित्साधीनानां रोगिणां कृते फलानि वितरितानि।
अस्मिन् कार्यक्रमे राजेशकुमारयादवः (सहायक-विकासाधिकारी-सहकारिता), एनसीसी-अधिकारी सतीशचन्द्रसिंहः, पूर्वप्रवक्ता महन्तपाण्डेयः, आशाकार्यकर्त्री, विभिन्नविद्यालयानां छात्राः, विविधविभागानाम् अधिकारिणः कर्मचारीणश्च बहुसंख्यया उपस्थिताः आसन्।

अत्रि चैरिटेबल न्यासस्य स्थापना-दिवसस्य उपलक्ष्ये निःशुल्कः स्वास्थ्यचिकित्सा-शिविरः आयोजितः



हिमसंस्कृतवार्ताः- दीपकशास्त्री, जीन्दम्, हरियाणा। बालिका संस्कृतविद्यापीठे पूज्यस्य स्वर्गीयस्य रामेश्वरदत्त अत्रिमहोदयस्य पुण्यस्मृतौ अत्रि चैरिटेबल ट्रस्टस्य स्थापना-दिवसस्य पावनावसरे निःशुल्कः स्वास्थ्यपरीक्षण-चिकित्सा-शिविरः आयोजितः। अस्मिन् शिविरे ग्रामवासिनां विद्यालयस्य अभिभावकानां च निःशुल्कं स्वास्थ्यपरीक्षणं कृतम्। विभिन्नरोगाणां विशेषज्ञैः चिकित्सकैः रोगिणां परीक्षणं कृत्वा उचितं चिकित्सापरामर्शं प्रदत्तम्। आवश्यकतानुसारं रोगिभ्यः निःशुल्कानि औषधानि अपि वितरितानि। कार्यक्रमे संस्थायाः अध्यक्षः श्रीमान् शरदकुमार अत्रिमहोदयः उपस्थितः आसीत्। विद्यालयस्य प्राचार्या डॉ. सुमन शर्मा अपि कार्यक्रमस्य शोभां वर्धितवती। शिविरे सर्वेषां प्रमुखरोगाणां विशेषज्ञाः चिकित्सकाः उपलब्धाः आसन्।संस्थायाः अध्यक्षः शरदकुमार अत्रिमहोदयः अवदत् यत् समाजसेवा एव मानवजीवनस्य श्रेष्ठं कर्तव्यम् अस्ति। प्राचार्या डॉ. सुमन शर्मा अपि उक्तवती यत् स्वस्थः समाजः एव समृद्धराष्ट्रस्य आधारः भवति। अन्ते आयोजकैः सर्वेषां चिकित्सकानां सहयोगिनां च आभारः प्रकटितः। अयं सेवाभावपूर्णः कार्यक्रमः जनमानसेषु विशेषम् उत्साहं प्रसन्नतां च जनितवान्



रविः खरिडेहालः - बेङ्गलूरु।

"उत्सवस्य ऋतुः विनोदेन पूर्णः भवेत्।"यस्य कृते सर्वाधिकं महत्त्वपूर्णा आवश्यकता अल्पं सारणम्अधिकं च बन्धनम् अस्ति

जङ्गमदूरभाषयन्त्राणि त्यक्त्वा परिवारेण, मित्रैः, शुभचिन्तकैः च पुनः सम्पर्कं कर्तुं सप्रमोदम् उत्सव-आचरणम् च उपायाः सन्ति। क्रियाकलापाः दीपकस्य कुम्भकारस्य चित्रकला, पारिवारिक-कुटुम्बचित्रकोशनिर्माणं, पारिवारिक-प्रश्नोत्तरस्य आतिथ्यं, आश्चर्य-उपहार-पेटिका, गृह-चलच्चित्र-प्रदर्शन-समयः, परिवार-पुरस्कार-रात्रिः च सन्ति । एतेषां कार्याणां कृते किञ्चित् पूर्वं योजना आवश्यकी भवति। कुटुम्बचित्रकोशस्य निर्माणे पुरातनचित्रं चित्रैः सह सम्बद्धानि पुरातनघटनानि च कुटुम्बचित्रकोशे गृहीतव्यानि भविष्यन्ति। एतेन कुटुम्बस्य अकथिताः कथाः कथयितुं अपि साहाय्यं भवति । पूर्वनियोजनं पारिवारिकप्रश्नोत्तरकार्यक्रमं निर्मातुं अपि उपयोगी भवति। हास्यं वा अन्यथा वा घटनां कुटुम्बे जनानां सह सम्बद्धं करणम्। हास्यसत्रं, अन्तरालपूरकं च निर्मातुं साहाय्यं करोति । अवकाशः उत्सवस्य च ऋतुः सृजनात्मकः भवति स्मरणीयः च दीपावली-उत्सवस्य इव परिवारं प्रकाशयति ।

मुख्यमन्त्री सुक्खू-मन्त्रिणः-विधायकाः च देहलीं प्रस्थिताः, अद्य जनसभायां सम्मिलिताः भविष्यन्ति, स्वकीय-वाहनेषु लोकवाहनेषु (बसयानेषु) च प्रस्थिताः कार्यकर्तारः

इण्डिया-गठबन्धनस्य जन-अभियाने तथा रामलीला-मैदाने आयोज्यमानायां जनसभायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खू स्व-मन्त्रिमण्डलेन विधायकैः च सह सम्मिलितः भविष्यति। एतदर्थं शनिवासरे मुख्यमन्त्री सुक्खू देहलीं प्रस्थितवान्। अधिकांशाः मन्त्रिमण्डलस्य मन्त्रिणः विधायकाः च अपि देहलीमार्गं गृहीतवन्तः।एतदतिरिच्य, निगमानां मण्डलानां च अध्यक्षाः उपाध्यक्षाः, प्रदेश-काङ्ग्रेस-समित्याः (पीसीसी) पदाधिकारिणः, जनपद-खण्डाध्यक्षाः च अपि कार्यकर्तृभिः सह देहलीं प्रस्थिताः सन्ति। काङ्ग्रेस-अध्यक्षः विनयकुमारः तथा सङ्गठनस्य महासचिवः विनोद-जिण्टा देहल्यां वर्तते, शनिवासरे च स्वप्रतिवेदनम् अपि दत्तवान्। वार्तानुसारं रविवासरे देहल्यां हिमाचल-काङ्ग्रेस-दलस्य शक्तिप्रदर्शनं भविष्यति।इण्डिया-गठबन्धनस्य जन-अभियानाय जनसभायै च देहलीस्थिते हिमाचल-भवने समग्र-प्रदेशात् कार्यकर्तारः प्राप्स्यन्ति, यदनन्तरं ते शोभायात्रायाः रूपेण जन-अभियानाय तथा रामलीला-मैदाने आयोज्यमानायै जनसभायै प्रस्थास्यन्ति। महत्त्वपूर्णा वार्ता इयं वर्तते यत् तिस्रः मुख्याः याचनाः आदाय लोकसभायां विपक्षस्य नेतुः राहुल-गान्धिनः नेतृत्वे इण्डिया-गठबन्धनस्य एतत् प्रदर्शनं भविष्यति।अपरपक्षे, अस्यां जनसभायां सम्मेलनाय प्रदेश-काङ्ग्रेस-समित्या कृतायाः व्यवस्थायाः अन्तर्गतं कार्यकर्तारः द्विशताधिकेषु (२००+) वैयक्तिकेषु तथा एचआरटीसी-लोकवाहनेषु (बसयानेषु) स्व-स्व-स्थानेभ्यः देहलीं प्रति प्रस्थिताः सन्ति।

सरदार पटेल विश्वविद्यालये राष्ट्रीय परिसंवादस्य आयोजनम्,

देशस्य विभिन्नभागेभ्यः समागताः विद्वांसः सरदार पटेल महोदयस्य राष्ट्रनिर्माणदर्शनस्य उपरि विचार विमर्शं कृतवन्तः



सरदार पटेल विश्वविद्यालये राष्ट्रीय एकतायाः विकसित भारत द्विसहस्र सप्तचत्वारिंशत् तमस्य च उपरि राष्ट्रीय परिसंवादः आयोजितः

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, मंडी। सरदारपटेलविश्वविद्यालये मण्डी इत्यत्र सरदार- वल्लभभाईपटेलः महोदयस्य जयन्त्याः राष्ट्रीय- एकता- दिवसस्य च उपलक्ष्ये सरदार वल्लभभाईपटेल महोदयस्य राष्ट्रनिर्माणदर्शनम् राष्ट्रीय एकतायाः अखण्डतायाः विकसित भारत द्विसहस्र- सप्तचत्वारिंशत् तमस्य च सन्दर्भे इति विषये राष्ट्रीयपरिसंवादः आयोजितः। कार्यक्रमे विश्वविद्यालयस्य कुलगुरुः आचार्यः ललितकुमार अवस्थी मुख्यातिथिरूपेण उपस्थितः आसीत्। ठाकुर- रामसिंह- इतिहास- शोधसंस्थानं नेरी हमीरपुर इत्यस्य निदेशकः डॉ. चेतरामगर्गः कार्यक्रमस्य अध्यक्षतां कृतवान्। इन्दिरागान्धी- कलाकेन्द्रं नवदेहली संस्कृतिमन्त्रालयः भारत सर्वकार इत्यस्य बृहत्तर- भारत- अध्ययन- विभागस्य प्रो. आचार्यः धर्मचन्द चौबे मुख्यवक्ता इन्दिरागान्धी- राष्ट्रीय- मुक्तविश्वविद्यालयः क्षेत्रीयकेन्द्रं शिमला इत्यस्य क्षेत्रीयनिदेशकः डॉ. जोगेन्द्रकुमारयादवः विशिष्टातिथिरूपेण उपस्थितः आसीत्। अस्मिन् अवसरे छात्रकल्याणम् अधिष्ठाता आचार्यः राजेशकुमारशर्मा कुलसचिवः शशिपालनेगी च विशेष- अतिथिरूपेण उपस्थिताः आसन्।कार्यक्रमस्य शुभारम्भः विश्वविद्यालय परिसरे सरदार वल्लभभाईपटेल महोदयस्य प्रतिमायां माल्यापणेन कुलगुरुणा राष्ट्रीय- एकतायाः शपथग्रहणेन च अभवत्। एतदनन्तरम् अतिथिभिः सभागारे आयोजितायाः प्रदर्श्याः अवलोकनं कृतम्। मञ्चे दीपप्रज्वलनं वन्दे मातरम् च इत्यनेन औपचारिक- कार्यक्रमः प्रारब्धः। छात्र कल्याण अधिष्ठाता आचार्यः राजेशकुमारशर्मा अतिथिनां स्वागतं परिचयञ्च प्रस्तुतवान्। इतिहासविभागस्य विभागाध्यक्षः कार्यक्रमसंयोजकः च डॉ. राकेशकुमारशर्मा परिसंवादस्य विषयवस्तुनः उद्देश्यानां रूपरेखायाश्च उपरि प्रकाशं क्षिप्तवान् यत् सरदार पटेल महोदयस्य राष्ट्रनिर्माणदर्शनम् अद्य अपि राष्ट्रीय- एकतायाः अखण्डतायाः सशक्त- भारतस्य निर्माणस्य च कृते अतीव प्रासंगिकम् अस्ति। अस्मिन् अवसरे राष्ट्रीय- परिसंवादेन सम्बद्धस्य स्मारकस्य विमोचनम् अपि कृतम्।मुख्यातिथिः विश्वविद्यालयस्य कुलगुरुः आचार्यः ललितकुमार अवस्थी स्वसम्बोधने अवदत् यत् सरदार- वल्लभभाईपटेलमहोदयः आधुनिक- भारतस्य महान् राष्ट्रनिर्माता आसीत्। स्वतन्त्रता प्राप्तेः अनन्तरं देशीयरियासतानां भारतीयसङ्घे एकीकरणं तस्य ऐतिहासिकं योगदानम् अस्ति। सः स्वदूरदर्शितया कूटनीतिककौशलेन दृढइच्छाशक्त्या च भारतस्य राजनैतिकीं भौगोलिकीं च एकतां सुनिश्चितां कर्तुम् महत्त्वपूर्णां भूमिकां निर्वहितवान्। सः अवदत् यत् राष्ट्रीय- एकतायाः अर्थः केवलं भौगोलिक सीमाणां रक्षणं नास्ति, अपि तु विभिन्न भाषाणां संस्कृतानां परम्पराणां च मध्ये परस्परं सम्मानस्य सामाजिक- समरसतायाः संवैधानिक मूल्यानां च सुदृढीकरणम् अपि अस्ति। सः अवदत् यत् विकसित- भारत- द्विसहस्र- सप्तचत्वारिंशत् तमस्य लक्ष्यं प्राप्तुम् आर्थिकप्रगत्या सह गुणवत्तापूर्णा शिक्षा, वैज्ञानिक अनुसंधानं, नवाचारः, महिला सशक्तिकरणं, सामाजिक समावेशः, युवानः च सक्रिय भागीदारिता आवश्यकी अस्ति। सः विश्वविद्यालयान् उच्चशिक्षणसंस्थानां च राष्ट्रनिर्माणस्य महत्त्वपूर्णम् आधारं कथयन् विद्यार्थिभ्यः सरदारपटेलमहोदयस्य जीवनात् दृढ सङ्कल्पस्य सङ्गठनात्मकशक्तिः राष्ट्रं प्रति समर्पणस्य च प्रेरणाम् प्राप्तुम् आह्वानम् अकरोत्।कुलपतिः अवदत् यत् सरदारपटेलमहोदयं प्रति श्रद्धाञ्जलिः तस्य आदर्शानां स्वव्यवहाराय कार्यसंस्कृताय सामाजिकजीवनाय च अपनापनम् अस्ति। सः विश्वासं प्रकटितवान् यत् राष्ट्रीयपरिसंवादे भविष्यमाणः विचारविमर्शः राष्ट्रनिर्माणस्य नूतनान् आयामन् पुरतः आनेष्यति, विद्यार्थिनः शोधार्थिनः च राष्ट्र प्रति स्वदायित्वानां निर्वहाय प्रेरयिष्यति। मुख्यवक्ता आचार्यः धर्मचन्दचौबे स्वबीजवक्तव्ये सरदारवल्लभभाईपटेलमहोदयस्य व्यक्तित्वस्य कृतित्वस्य स्वतन्त्रता- आन्दोलने योगदानस्य देशीयरियासतानाम् एकीकरणे च तस्य ऐतिहासिकभूमिकायाः उपरि विस्तारेण प्रकाशं क्षिप्तवान्। सः अवदत् यत् सरदारपटेल महोदयस्य दूरदर्शिता, दृढ- इच्छाशक्तिः, सङ्गठनक्षमता, राष्ट्रं प्रति समर्पणं च स्वतन्त्रभारतस्य एकतायाः अखण्डतायाः च सुदृढम् आधारं प्रदत्तवन्तः।कार्यक्रमस्य अध्यक्षः डॉ. चेतरामगर्गः स्व- अध्यक्षीयसम्बोधने भारतीय- इतिहासस्य सांस्कृतिकचेतनायाः राष्ट्रीय- एकतायाः च महत्त्वं रेखाङ्कितवान्। सः अवदत् यत् राष्ट्रस्य सशक्तनिर्माणं स्व- ऐतिहासिक- विरासतयाः सांस्कृतिकमूल्यानां सामाजिकसमरसतायाः च संरक्षणेन एव सम्भवम् अस्ति। सः विद्यार्थिनः शोधार्थिनः च भारतीय- इतिहासस्य विभिन्नपक्षाणां गाम्भीर्येण तथ्यपरकशोधाय च आह्वानम् अकरोत्। कुलसचिवः शशिपालनेगीवर्यः धन्यवादप्रस्तावं प्रस्तौत् सर्वान् अतीथीन् सहयोगीसंस्थाः विद्वांसः शोधार्थिनः प्राध्यापकान् विद्यार्थिनः च आभारं प्रकटितवान्। उद्घाटनसत्रस्य अनन्तरम् आयोजितचर्चायां राजस्थानस्य सेवानिवृत्तः आचार्यः डॉ. सुरेन्द्र डी सोनी अध्यक्षतां कृतवान्। हिमाचलप्रदेश- केन्द्रीय- विश्वविद्यालयस्य इतिहास विभागाध्यक्षः डॉ. जगदीशप्रसाद सह अध्यक्षस्य भूमिकां निर्वहितवान्, यदा तु समाजविज्ञान अधिष्ठाता प्रो चन्द्रदीपकंवरः हिमाचलप्रदेश- केन्द्रीय- विश्वविद्यालयस्य मुख्यवक्तारूपेण सहभागितां कृतवान्। परिसंवादस्य अन्तर्गतं द्वौ तकनीकौ सत्रौ अपि आयोजितौ। प्रथमसत्रस्य अध्यक्षता प्रो. चन्द्रदीपकंवर कृतवान्। सह अध्यक्षरूपेण डॉ. राकेशकुमारशर्मा उपस्थितः आसीत्। द्वितीयसत्रस्य आयोजनम् आभासीमाध्यमेन कृतम्। अस्याः अध्यक्षता डॉ. अङ्कुशभारद्वाजः कृतवान्। सह अध्यक्षः डॉ. प्रशान्त गौरव आसीत्। एवं परिसंवादे आहत्य द्विचत्वारिंशत् शोधपत्राणि प्रस्तावितानि।

कार्ये हराज सैनी, हेमराज रावत, डॉ. जगदीप वर्मा, डॉ. चेतन चौहानः, डॉ. नीलम ठाकुर, प्रो. धर्मचन्दचौबे दिल्ली, प्रो. सुरेन्द डी सोनी राजस्थान, प्रो. चन्द्रदीपकंवरः डॉ. जगदीश प्रशाद धर्मशाला, डॉ. चेतरामगर्ग हमीरपुरं, पुनेश गौतमः, एडवोकेट लीना, प्रियंकानाथ इत्येतैः सह विश्वविद्यालयस्य विभिन्नविभागानां प्राध्यापकाः अधिकारिणः कर्मचारिणः शोधार्थिनः विद्यार्थिनः च उपस्थिताः आसन्। परिसंवादे देशस्य विभिन्न विश्वविद्यालयैः शोधसंस्थानैः च सम्बद्धाः विद्वांसः इतिहासकाराः शिक्षाविदः शोधार्थिनः च सहभागितां कुर्वन् सरदारपटेल ₹महोदयस्य राष्ट्रनिर्माणयोगदानस्य तस्य विचाराणां समकालीन- प्रासंगिकतायाः च उपरि विचारविमर्शं कृतवन्तः।

अखिल भारतीय संस्कृत परिषद्, लखनऊ में 'लोकसंस्कृतेः महानायकः मर्यादापुरुषोत्तमः श्रीरामः आदिशक्तिः जगदम्बा च' इति विषये विशिष्टव्याख्यानम् आयोजितम्



व्याख्याने भारतीयलोकसंस्कृतौ श्रीरामस्य जगदम्बायाश्च महत्त्वं प्रतिपादितम्; डॉ. सूर्यप्रकाश-शुक्लस्य शोधग्रन्थस्य 'नवनीत' इत्यस्य लोकार्पणमपि सम्पन्नम्।

अखिलभारतीयसंस्कृतपरिषदः, लखनऊ इत्यस्य तत्त्वावधाने २०२६ तमस्य वर्षस्य अक्तूबर-मासस्य ३१ दिनाङ्के 'लोकसंस्कृतेः महानायकः मर्यादापुरुषोत्तमः श्रीरामः आदिशक्तिः जगदम्बा च' इति विषये विशिष्टं व्याख्यानम् आयोजितम्। अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण श्रीगुरुगोविन्दसिंहजी- महाराज- राजकीय-स्नातकोत्तर- महाविद्यालयस्य, पलियाकलाम्, लखीमपुरखीरी इत्यस्य प्राचार्यः संस्कृतस्य च विद्वान् डॉ. सूर्यप्रकाशशुक्लः स्वविचारान् प्रस्तुतवान्। मुख्यवक्त्रा भारतीयलोकसंस्कृतौ मर्यादापुरुषोत्तमस्य श्रीरामस्य आदिशक्तेः जगदम्बायाश्च स्वरूपस्य महत्त्वं विशदीकृतम्। तेन प्रतिपादितं यत् भारतीयजनमानसे एतयोः स्थानम् अत्यन्तम् अद्भुतं वन्दनीयं च अस्ति। श्रीरामः मर्यादायाः, सत्यस्य, त्यागस्य, करुणायाः, कर्तव्यनिष्ठायाः आदर्शजीवनमूल्यानां च प्रतीकः अस्ति। अपरतः आदिशक्तिः जगदम्बा सृजनस्य, शक्तेः, संरक्षणस्य, साहसस्य, नारीचेतनायाश्च अधिष्ठात्री मातृदेवी अस्ति।

भारतीयलोकजीवने श्रीरामस्य कथा रामायणस्य, रामलीलायाः, लोकगीतानां, भजनानां तथा विविधलोकपरम्पराणां माध्यमेन पीढीतः पीढीं प्रवहति। श्रीरामस्य चरित्रं केवलं धार्मिकश्रद्धायाः विषयः न, अपि तु सामाजिकसमरसतायाः, पारिवारिकादर्शानां, सुशासनस्य मानवीयमूल्यानां च स्थापनायाः प्रेरणास्रोतः अस्ति। तथैव जगदम्बायाः उपासना नारीशक्तेः सम्मानस्य, अन्यायस्य प्रतिकारस्य, धर्मस्य सत्यस्य च विजयस्य सन्देशं ददाति। नवरात्रस्य, दुर्गापूजायाः, रामलीलायाः, विजयादशम्याः विविधक्षेत्रीय- लोकमहोत्सवानां च माध्यमेन श्रीरामस्य जगदम्बायाश्च महिमा भारतीयसांस्कृतिकजीवने अभिव्यज्यते। लोकगीतानि, लोकनाट्यानि, लोकगाथाः पारम्परिकानुष्ठानानि च भारतीयसंस्कृतेः जीवन्ततां लोकमानसस्य च अटूटश्रद्धां प्रतिबिम्बयन्ति। वर्तमानपरिप्रेक्ष्ये श्रीरामस्य आदर्शानां जगदम्बायाः शक्तिसन्देशस्य च प्रासङ्गिकता अधिकतया वर्धते। अतः एतेषां जीवनमूल्यानां नवपीढ्यां प्रसारणं तथा भारतीयलोकसंस्कृतेः समृद्धपरम्परायाः संरक्षणं संवर्धनं च आवश्यकम् इति तेन प्रतिपादितम्। अस्मिन्नेव अवसरे मुख्यवक्ता डॉ. सूर्यप्रकाशशुक्लेन विरचितस्य 'नवनीत' इति शोधग्रन्थस्य लोकार्पणमपि सम्पन्नम्। कार्यक्रमस्य मुख्यातिथिरूपेण लखनऊविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वाध्यक्षः प्रो. रामसुमेरयादवः उपस्थितः आसीत्। सारस्वतातिथिरूपेण लखनऊ-विश्वविद्यालयस्य हिन्दीविभागस्य पूर्वाचार्यः प्रो. हरिशङ्करमिश्रः विषयसम्बद्धं सारगर्भितं वक्तव्यं प्रस्तुतवान्।अखिलभारतीयसंस्कृतपरिषदः मन्त्री प्रो. प्रयागनारायणमिश्रः वाचिकस्वागतं कुर्वन् विषयस्य प्रवर्तनं कृतवान्। कार्यक्रमस्य अध्यक्षतां परिषदः उपाध्यक्षः डॉ. रविकिशोरत्रिवेदी अकरोत्। तेन भारतीयसंस्कृतौ श्रीरामस्य आदिशक्तेः जगदम्बायाश्च विशिष्टमस्तित्वं महत्त्वं च विशेषतया प्रतिपादितम्।कार्यक्रमे लखनऊविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. अभिमन्युसिंहः, डॉ. अशोककुमारशतपथी, डॉ. गौरवसिंहः, डॉ. कुसुमसिंहः, डॉ. रेखाशुक्ला, प्रो. वन्दनाद्विवेदी, डॉ. आनन्ददीक्षितः, डॉ. नीलमपाण्डेयः इत्यादयः विद्वांसः विशेषरूपेण उपस्थिताः आसन्।कार्यक्रमस्य सञ्चालनम् अखिलभारतीयसंस्कृतपरिषदः संयुक्तमन्त्री डॉ. अनिलकुमारपोरवालः अकरोत्। कार्यक्रमस्य संयोजिका डॉ. पत्रिकाजैन आसीत्। धन्यवादज्ञापनं लखनऊविश्वविद्यालयस्य संस्कृत-प्राकृतभाषाविभागाध्यक्षः प्रो. अभिमन्युसिंहः कृतवान्। वैदिकमङ्गलाचरणं मुकेशकुमारेण, लौकिकमङ्गलाचरणं सिन्धुपटेलद्वारा, स्वागतगीतम् कीर्त्या समरीतायादवेन च प्रस्तुतम्। प्रभवपाण्डेयेन शान्तिपाठः कृतः, यत्र उपस्थितैः समवेतस्वरेण सहभागिता कृता।

कार्यक्रमे अनेकाः विद्वांसः, ज्योतिषविभागस्य संस्कृतविभागस्य च शोधच्छात्राः सहिताः पञ्चाशदधिकाः श्रोतारः उपस्थिताः आसन्।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम

हिमालये यदा आकाशात् हिमम् पतति तदा तत् हिमम् काष्ठचूर्णम् सादृश्यम् भवति किन्तु किञ्चित् समयानन्तरं तत् पाषाणात् अपि घनीभूतम् भवति। तादृशी वासनाः अपि सूक्ष्मः तथा च आनम्यः सन्ति, किन्तु वयं वासनाः देहबुद्ध्या दार्ढ्यं घट्टायते। प्रायः वासनाभ्यः मोक्तुम् न शक्यते। वासनाभिः क्षीणाः कर्तुम् ईश्वरस्य स्मरणम् एकमेवः उपायः वर्तते।



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य मया काञ्चन विचित्राः वार्ताः आनीताः। प्रथमा वार्ता तुर्कीदेशस्य अस्ति। तत्र विवाहसमये एकया वध्वा महान् वातगोलक-समूहः हस्ते धृतः। सहसा तीव्र-वायुना सा वधूः वातगोलकैः सह आकाशं नीता! भीतैः जनैः सा पुनः अधः आकृष्टा रक्षिता च।

नन्दिनी- अहो! वातगोलकैः वधूः आकाशं नीता! एषा अतीव भयङ्करी हास्यजनिका च घटना। इदानीं द्वितीया वार्ता श्रूयताम्। अमेरिका-देशे एकस्मिन् विमाने कुक्कुरेण मूत्रं त्यक्तम्। ततः विमानचालकेन यात्रिणः पृष्टाः- "किं वयं मार्जनार्थं प्रतीक्षामहे उत दुर्गन्धेन सह गच्छामः?" इति। यात्रिभिः एव अस्य विषयस्य निर्णयः मतदानेन कृतः।

काव्या- दुर्गन्धेन सह विमान-यात्रा अतीव कष्टप्रदा! यात्रिणां स्थितिः मया अनुमीयते। कुक्कुरस्य वार्ता श्रुता, इदानीं यन्त्र-कुक्कुरस्य वार्ता अपि श्रूयताम्। सान-फ्रान्सिस्को-नगरे एकया संस्थया यन्त्र-कुक्कुराणां भ्रमणार्थं जनाः नियोजिताः। एकस्याः होरायाः कृते विंशति-डालरमूल्यं तेभ्यः दीयते। परन्तु यदि मार्गे यन्त्रकुक्कुरस्य विद्युत्-कोशः रिक्तः भवति, तर्हि सः गुरुः यन्त्रकुक्कुरः जनैः स्कन्धे ध्रियते नीयते च।

नन्दिनी- हा हा! जनाः कुक्कुरस्य भ्रमणार्थं गताः, परन्तु अन्ते यन्त्रस्य भारः तैः एव ऊढः! अतीव विचित्रम्। अस्माकं भारते अपि एका विचित्रा घटना दृष्टा। विमानेषु बम-विस्फोटकस्य असत्य-सूचनाः केनचित् प्रेषिताः। आरक्षकैः अन्वेषणं कृतम्। अन्ते एकः लेखकः तैः गृहीतः। आश्चर्यं यत् तेन लेखकेन आतङ्कवाद-विरोध-विषये एव एकं पुस्तकं लिखितम्!

काव्या- अहो आश्चर्यम्! आतङ्कवाद- विरोध-विशेषज्ञेन एव आतङ्कः उत्पादितः। एताः सर्वाः वार्ताः अतीव विचित्राः। अद्यतनः कार्यक्रमः अत्रैव समाप्तः। नमो नमः।